Bill No. 2/07-08

127

2008-0140

वैद्यकशब्दसिन्धु

2nd edn, N.S. Press, Mumbai

1966 Vikramera

प्रस्तावना.

अवधारयन्तु विदितानवद्यविद्यावृन्दविदीर्णमोहान्धतमसो विद्रुषः परमवैदूष्यधुराधरणधौरेयानवद्यविद्यात्रजावदातात्मनां तत्रजवतां श्रीमतां मुनिसुन्दराह्वयानां त्रैविद्यनैपुण्यं ग्रन्थस्यास्य शैशवविहितस्यावधारणेन, लक्षणादिशास्त्रशिक्षारुचिरत्वमपि न कथञ्चनैतन्निरीक्षणेन क्षुण्णमवलोकयिष्यते तत्रजवद्भिर्जवद्भिः,सदाचारपरीक्षाक्षमत्वमपि क्षमाधराणामिवैषां पूज्यानामवलोकनेनैतस्यावतरिष्यत्येव वाग्गोचरातीतं दृष्टिपथं, यतोऽत्रावलोकनीयमवलोकनसौन्दर्यमत्रजवतां प्रयोगवैचित्र्यानुप्रासादिकमलङ्कारविछेद्यमत्र तत्रजवद्भिः, प्रथमं तावद्भट्टारका वितेनुः स्वीयं जयश्र्यङ्कविन्यासेन मंगलाचरणं जिनवरनतिमयं, पूज्यानां हि समयोऽयं यद्ग्रन्थारम्जे जयश्रीरान्तरारीणामित्यध्यात्मपूर्णहृदयोदध्युल्लासशशधरसमश्रीअध्यात्मकल्पद्रुमस्याद्यपद्ये, जयश्रियं रातु जिनेन्द्रचन्द्रमा इत्यनल्पमहिमगुरुगणगुणगरिमोज्झिरणपवित्रविविधपद्यमय्यां गुर्वावल्यां च यथा विलोक्यते विज्ञैस्तथा न्यसनीयो जयश्रीप्रदो जयश्रीशब्दः सएव चात्रापि, न केवलं गीर्वाणवदनावतारिण्यां गीर्वाणजाषायां किंतु स्वजावसुजगानेकार्थततिनिधानकल्पायां प्राकृतवाण्यामपि शान्तरसप्रधानायामयमेवांको न्यासि न्यासनिपुणैरुपदेशरत्नाकरादौ जयसिरीत्याद्यवलोकनाच्छ्रीमद्विहिते, जवन्ति च पुरुषविशेषनिर्मिता ग्रंथा एवंविधांकांकिता यथा जगवद्भिः श्रीहरिजद्रसूरिपादैर्विनिर्मितेष्वगण्यगुणाकरेषु ग्रन्थेषु विरहांकोऽङ्कि वाराणसीवासजातमदोद्धुरविपश्चित्ततिविजया-

Indira Gandhi National Centre for the Arts

वास्तयथार्थन्यायविशारदपदसदालोकलोकलोचनलोभकानेकदुस्तरतर्करत्नाकरग्रंथशतविधानवितीर्णन्यायाचार्यपदाप्तक्रिया-
करणासादितगण्युपाध्यायवाचकादिपदाः श्रीमद्यशोविजयचरणाश्च ऐंकारांकं संस्थापयामासुः प्रतिग्रंथमारंभे, परमाद्यानां
प्रायश्चित्तप्रतिपत्तिसंबंधादन्येषां चोपगंगमैंकारजापविधानात्कवित्वविस्त्वप्राप्तिसद्भावाद्यथांककरणे स्पष्टतरमुपलक्ष्यते लक्षणा-
दिदक्षैः प्रयोजनं परं नैषां पूज्यानां प्रोक्तमन्तरेणान्यत्, भविष्यति च कदाचित्तत्परन्न तदस्माभिर्व्यलक्षि यदि परं स्यात्के-
षांचित् ज्ञातं ज्ञापनीया वयमुपकारधिया। अनन्तरं चापरगुरुस्मरणस्यावश्यकतामभिमन्यमानैरभियुक्तैरभियुक्तदेवतास्मरण-
स्थानीयं यथार्थाभिधानभृतां श्रीज्ञानसागरनामधेयानां स्मरणमकारि समुददीपि च प्रस्तुतप्रकरणप्रकरणपटिष्ठोपदेशनि-
दानताज्ञापनेन तेषां त्रैविद्यनदीष्णता, जायेतैवच जिज्ञासा जिज्ञासूनां श्रीमद्विषयिणी, सा च समापनीया सुधीभिः प्रकरण-
कृद्विहितगुर्वावलीगततत्प्रकरणावलोकनेन तद्यथा “ श्रीसोमसुंदरगुरुप्रमुखास्तदीयं, त्रैविद्यसागरमगाधमिवावगाह्य ॥
प्राप्योत्तरार्थमणिराशिमनर्घ्यलक्ष्मीलीलापदं प्रदधते पुरुषोत्तमत्वम् ॥ १ ॥ ” श्रीसोमसुंदराचार्यप्रवरा ये प्रकरणकृद्गुर-
वस्तेऽपि श्रीपूज्यपादवितीर्णोपदेशामृतपानपीनाः, अनेन य आचचक्षिरेऽनवलब्धग्रन्थसतत्त्वाः यदुत ‘न भट्टारकाः श्रीसोम-
सुंदरपादान्तेवासिनः कथमन्यथा भवेयुर्द्वयेऽपि सहाध्यायिनः कथंकारं च प्रायः समानवयस्कानां गुरुशिष्यभावोऽ-
संभव्येव च लघीयद्भ्यः शिष्यार्पणं पूज्येभ्यः कुर्युः श्रीदेवसुंदरमिश्राः इतीति ’ केचित् परमविचारितरामणीयकमेतत् यतः
ख्यापयन्त्येव पूज्यपादाः स्वयमेव श्रीमद्दीक्षितत्वमात्मनां शिष्यतामप्रतिमां च । “शिष्यस्तदीयोऽयमपीतिमन्यते श्रीवा-
चकेन्द्रेष्वगुणोऽपि मादृशः ॥ ग्रहप्रभोः पुत्र इति ग्रहावलौ न पूज्यते पंगुरपीह किं शनिः ॥ २० ॥ अहो तेषां कराम्भो-

Indira Gandhi National Centre for the Arts

जवासानां सुप्रज्ञावता ॥ जातो यैर्मौलिगैर्योग्योप्यहकं मुनिसुंदरः ॥ २१ ॥” इति गुर्वावलीगौरवाविष्कर्त्र्यां गुर्वावल्यां । तत्र प्राक्तनाः कल्पनाशिल्पनिर्मिता विकल्पकल्लोलाः प्लावयितुं स्युः श्रीसोमसुंदरसूरिपट्टे एकपञ्चाशत्तमः श्रीमुनिसुंदर इत्यादिव्याख्यानकुलिशं प्रज्ञविष्णवः । प्रायः समानवयस्कत्वादिकारणानि चालङ्कितसाधुपदगौरवार्हाणामेव चेतसि विदध्युर्वासनां नतु विज्ञातगुरुपदैदंपर्येतिहासानां । यच्च विद्यमानेष्वपि किमिति सोमसुंदरसूरिषु श्रीमद्देवसुंदरपादवर्णनमित्यनूद्यते तदप्यसमंजसमेव, यतो द्वयेऽपि वेविद्यमाना एव ते, सत्सु च देवपादेषु यत्सोमगुरुपादवर्णनं तदेव तेषां तच्छिष्यतासूचकमित्यलं विशेषेण, वर्णनीयता तु श्रीमद्देवसुंदरपादानामसमभक्तिप्राग्भारनिभृतहृदयस्मरणीयत्वद्योतनाय, बृहद्गच्छाधीशत्वेन पूज्यपूज्यानां चातिशयितपूजास्पदत्वस्याव्याहतेश्चात एव च तद्विनेय इत्यभिहितं श्रीमद्भिः सामान्यतस्तदियता प्रबन्धेन श्रीमतां दीक्षागुरवः श्रीसोमसुंदरचरणा ज्ञानगुरवः श्रीमन्तो ज्ञानसागरा ज्ञानसागरा गच्छाधिपाश्चोद्देशाद्यतुच्छफलकल्पनकल्पमहीरुहमाना देववदाराध्यपादाः श्रीयुतो देवसुंदरसूरय इति निर्णयोनाबाधोऽव्याहतश्च, ज्ञानसागरगुरूणां त्रैवैद्यविषयोपदेशाश्रय इति तदणीयोमहिमाख्यानं । ततो गोष्ठीविधानभूमिकल्पो विद्वद्विधानयोग्यायोग्यपरीक्षणसम्यग्विज्ञातवाङ्मयविद्वत्समागमोऽन्नवानन्दनन्दिश्चक्रे वक्रेतराशयैः, पश्चाच्छास्त्राभ्यासानुयोगावसरोदीर्णप्रतिज्ञा विशुद्धबुद्ध्याद्योगः १ सद्गुरुसमायोगः २ सद्गुरुविनयप्रयोगः ३ पुस्तकप्राप्तियोगः ४ प्रमत्ततावियोगः ५ सततोपयोगः ६ शुद्ध्यभियोगः ७ देहारोग्यभाग्यादीनि साधनान्यैदंयुगीनान्तेवासिवर्गविमृश्यतमान्याचख्युः ख्यातमाहात्म्याः, आख्याय च विद्वद्गोष्ठीगुणगणाञ् ज्ञानद्रुमोन्मूलनमातंगत्रिवर्गविध्वंसनव्यग्रदर्पापाकरणप्रकरणेऽनेकाननणुप्रज्ञावत्रावारांनिधीन् पुरुषसिंहान् यथार्था-

वाप्ताभिधानश्रीमद्दिवाकरवादिचक्रचूडामणिप्रभश्रीमल्लवादिमनोहारिभद्रभरनिर्जितमोहमोषकोपद्रवश्रीमद्धरिभद्रसर्वविसं-
वादिनिर्मूलस्वकल्पनाशिल्पिमात्रनिर्मितग्रंथततिविततनविज्ञापगतलज्जादिगम्बरमदनिर्मथनदेवसूरिसख्यश्रीदेवसूरिब्रह्मगोच-
रातिगनिरवद्यचातुर्विद्यविधानविज्ञामारिपटहोद्घोषणख्यापिताभयप्रदत्वगुणमहिममहीपालकुमारपालकुमुदकौमुदीपतिश्रीहे-
मचन्द्राचार्यप्रभृतीन् ज्ञानरत्नरत्नाकराणां कृत्यमतनुप्रभावं गुणोपार्जनावश्यकतां गुणवद्गृह्यतां लोकानामाराध्यतमतां च
गुणिनामाविर्भावयामासुः । लक्षणगोष्ठ्यां अन्तरेणेङ्क् अध्ययने इतिधातुं अधीये इति १ उच्यतीति २ व्याघ्रा इति ३ जा-
गृक् निद्राक्षय इत्यंतरा जागर्त्ति इत्यादीनि त्याद्यन्तानि, पंचहलानीतिसमासे त्यादौ त्रयोदश रूपाणि धातोरेकस्यासंसृष्टानि,
विना गमिं जगामेति, मारिरेकाम, मामिनीभाम, माभ्यां (माभ्यां) दधिसेक् इत्यादीनि रूपाणि, गतिकारक इति, नित्याद-
न्तरंगं बलीय इति च न्यायः; छंदोनुशासनगोष्ठ्यां मागध्यां ५७५०००००० उपहासिन्यां ४५५९७५०००० आर्यायां
८२९२०००० भेदाः, प्रस्तारादयः षट्र प्रत्ययाः; काव्यगोष्ठ्यां काव्यलक्षणं शब्दार्थभेदाः दोषा गुणा भूषणानि अर्थवैचि-
त्र्यहेतवः, प्रमाणगोष्ठ्यां च प्रामाणिकभेदाः देवगुरुधर्मतत्त्वलक्षणानि । प्रस्तावनामात्रमेतदखिलमर्हद्देवनिर्ग्रन्थगुरुनि-
ष्कलंकधर्मयथास्थितवस्तुतत्त्वप्रतिपादनस्य । देवलक्षणं तत्र तावद्विपश्चिद्वृन्दवेद्यविद्यावर्यता निजगदू रागादिदोषानाली-
ढत्वममलकेवलपरिवृढितां प्रतिहतात्मगुणप्रहननप्रत्यलघातिकर्मनिचयतां प्रशमामृतनिमग्नवदनेन्दुविकस्वरारविन्ददल-
प्रख्यनयनद्वन्द्वज्ञापितक्रोधादितिरस्कृतिं बालकमनीयकामिनीशून्यांकानुमापितस्मरतिरस्कारं द्विषद्दारणहसास्त्रायोग-
ख्यापितदोषप्लोषं; व्यतिरेके निदर्शयामासुरन्येषां विस्तरतोऽतथात्वं अरक्तद्विष्टानां देवतत्त्वपरीक्षणाय परीक्षाचणाः ।

Indira Gandhi National Centre for the Arts

प्रोक्तवन्तः प्रवचनसौधस्तम्भश्रीमद्धारिभद्रीयश्लोकतत्त्ववचांसि नेत्रैर्निरीक्ष्येत्यादितो यस्य निखिलाश्च दोषा इत्येतदन्तं श्लोकितदेवतत्त्वाय स्तोकश्लोकास्पदाञ्लोकान्, तथेशः किमिति, ब्रह्मा चर्माक्षसूत्रीति च पद्ययुगल्यामलया परोक्तमप्यन्ववादिषुर्देवस्वरूपनिरूपकं। प्रतिपादितौ परेण मनुष्यमात्रासर्वज्ञत्वाख्यावदेवत्वदर्शकौ निषेधाय देवत्वस्यासिद्ध्यादिदोषाघ्रातत्वदर्शनेन निरस्यासमकल्याणकरणप्रवणकल्याणकमहिमोद्भावनेन निरचैषुश्चेतनाञ्चणाः श्रीजिनस्यैव यथार्था देवतत्त्वावतारितां लोकातिगावाप्तावस्थानां च सिद्धानां प्लुष्टानन्तकालप्रचितमूलनिचयकर्मनिकराणां स्वभावज्ञानदर्शनवीर्यसुखानंत्ययुक्तानामिति। गरिमगुरुतास्पदश्रीगुरुतत्त्वपरीक्षणे समस्तश्रेयोवितरणदक्षसम्यग्दर्शनज्ञानचरणाराधनचञ्चवस्तदुपदेशनपराः पञ्चमहाव्रतीधूर्धरणधौरेया गौरवार्हा गुरवो निरचायिषत निश्चयाख्याननिपुणैः, प्रणिगदितं चागमनिष्णातैरारम्भपरिग्रहनिरतानामगुरुत्वं माध्यस्थ्येन। अभ्युदयनिःश्रेयससाधनसाधीयोधर्मनिरूपणे अभयदानं मिथ्यावचनादत्तादानाब्रह्मपरिग्रहेभ्यो निवृत्तिः क्रोधमानमायालोभाभिधानकषायचतुष्कधिक्कृतिः विनयार्जवादिगुणाधिकारश्च यत्र सुप्रयत्नप्रतिपादितः स एव धर्मः, कुतीर्थिककथितस्य तु तस्यातथात्वं जीवतत्त्वावबोधलक्षणप्रयत्नाभावादसर्वज्ञप्रणीतत्वान्निस्त्रिंशपरिगृहीतत्वाच्च ततं ततबोधांशुभिः पूज्यैः। तत्राद्ये हेतौ स्नानादेर्धर्मता सप्रसंगं निराकृता प्रतिष्ठापितं चापां सजीवत्वं प्रकरणतो वीतरागाणामेव यथार्थवादित्वं च, द्वितीये च तदागमतत्प्रकाशकानामसर्वज्ञत्वं तदागमानां च परस्परविरुद्धार्थाविर्भावकताविनाभाविता हिंसाद्यतिनिकृष्टोपदेशदानपटुता च साधिता, तृतीयस्मिंस्तु तस्मिन् सविस्तरं तत्परिगृहीतॄणां निस्त्रिंशता भवाभिनन्दिता च प्रादुर्भाविता। तदेवं देवगुरुधर्मरूपा तत्त्वत्रयी अत्राततातनुबोधैः शैशवे-

प्यशैशवमतिभिरिति यथार्थाभिधास्य त्रैविद्यगोष्ठीति । यतो नात्र विश्वे वेविद्यते कापि विद्यावदातकल्याणपरा विहायैतत्तत्त्वत्रयीं, वेदनाद्विचारणात् प्रापणार्हत्वाच्चास्या नांशतोऽपि विद्यात्वं जंघन्यते । यथावदवबोधश्चासमाप्ति निरीक्षणादेवास्या भावी, नहि सूर्यप्रयोजनं मुकुराक्रान्ततद्बिम्बेन बोभूयमानमवलोक्यते । तथा चाशासे लब्ध्वानया प्रस्तावनया प्रमेयं प्रमेयं समग्रामेनामध्येतुं श्रोतुं वा प्रयतेरन् प्रवर्तेरंश्चैतदभिहिते तत्त्वत्रयाराधनेऽनल्पकल्पनातिगफलसंपत्तिसंपादनसमर्थ इति सागरान्तानन्दनामधेयः ॥

पूज्यानां चरित्रं नात्र विस्तरतो निरूपितं सोमसौभाग्यहीरसौभाग्यगुर्वाह्वयादिषु मुद्रितचरेषु यथार्हं निरूपितत्वाभिरूपकैः, स्खलनायाश्च छद्मस्थस्वभावत्वादनाग्रहाया यदि कोप्यत्र मुद्रणादौ भवेद्दोषः प्रमार्ज्यः परमकारुणिकैर्विधाय करुणामनुग्रहाभिलाषुके मयि, ज्ञापयितव्यश्च यदस्मिन्नस्मिन् स्थानेऽमुकोऽमुको दोषो यतो द्वितीयावृत्तौ विदधामि विशोधनं, तस्येहजातदोषस्य च वितरामि मिथ्यादुष्कृतं सकलजिनमार्गाराधनसावधानपूज्यचरणश्रीसंघसमक्षमिति १९६६ आश्विनशुक्लषष्ठ्यां सुरतपत्तनेऽलेख्यानन्देन ॥

Indira Gandhi National Centre for the Arts

सहस्रावधानधुराधरणधौरेयश्रीमुनिसुंदरसूरीश्वर-
कृता श्रीत्रैविद्यगोष्ठी

॥ एँ ॥ नमः सर्वविदे । विघ्नवल्लिविध्वंसिने कुठाररूपाय गुरवे नमः । ऐंनमः ॥ जयश्रीलीलालीर्वितरतु ममानंतमहिमा, जिनः श्रीमान् वीरस्त्रिजुवनविज्ञुः सर्वकलनः । प्रवादा यस्यैवागमजलनिधेरत्र निखिलाः समादाय स्वैरं कतिपयलवान् सत्त्वमज्ञजन् ॥ १ ॥ श्रीज्ञानसागराह्वस्वगुरूणां ज्ञानवारिधिं । उपजीव्योपदेशं च कुर्वे त्रैविद्यगोष्ठिकां २ । नमो वितततैकांतिकात्यंतिकहितहेतुन्यः श्रीमज्जुरुन्यः । इह किल स्वपरसमयार्थसार्थादूष्यवैदूष्यपरिकर्मितमतयो विज्ञपतयः प्रायस्त्रैवैद्यगोष्ठीरतयो जवंतीति तन्मनोविनोदाय तद्विषये किंचिदुच्यते । तत्र त्रेधाः प्रायो विदग्धा उपलज्यंते । तथाहि । केचन परमतमप्राचीनागण्यपुण्यप्रचयोपलब्धश्रीमज्जुरुचरणपरिचर्याप्रसादप्राप्तानवद्यविद्याविलासोपहृतसहृदयहृदया अपि अवगतवस्तुसतत्त्वतया न कदाप्यजिमानकालुष्यमाश्लेष्यंते ? केचन च किंचित्प्राचीनप्रचिताप्रधानकर्म्ममर्म्मवशातो निष्प्रतिमप्रतिज्ञातिरेकोद्भवाहंकारप्रचारप्रचारिताविवेका अपि सुयुक्तियुक्तोपदेशश्रवणादिना, स्वतोप्यधिकतरप्रज्ञाप्रकर्षप्रतिहतप्रवीणप्रकराप्रमाणप्रज्ञिलत्वाजिमानप्रकृष्टप्राज्ञपुरुषविशेषसमीक्षणादिना वा, व्यपहायावलेपाद्येपं सम्यग्गुणानुरागासंगिनो बो-

Indira Gandhi National Centre for the Arts

भूयुः । इह कतिचित्पुरुषा अनादिकालमपारसंसारकांतारोदरप्रसरणोपार्जितानिष्टकष्टौघहेत्वष्टपुष्टदुष्टादृष्टरक्षोधिष्ठिता वि-
शिष्टमार्गासंसर्गिणः कथमपि परमतमप्रयासप्रसाधितकतिपयशास्त्राभ्यासा अपि परमार्थतो निविरूजडिमप्रचंडिमावष्ट-
ब्धचेतस्कतया शृण्वंतोऽपि तत्तन्निर्व्यपदेशोपदेशं, पश्यंतोऽपि च बहुरत्नायां वसुंधरायां तारतम्येन स्वतोऽधिकाधिकतर-
निस्तुषमनीषासमुन्मेषोल्लासिप्रवीणव्रातान्, अखर्वगर्वपर्वतारूढमूढचेतोवृत्तितया न कदापि गुणानुरागानुषंगपूर्वकं मार्दवं
वा भजति । अनर्हाश्चैते सर्वथा असाध्यामयप्रचयप्रपीडितांगांगिवत् सदुपदेशादिप्रतीकारस्य, अनधिकृताश्च ते प्रबुद्धै-
रविबुधा विबुधजनोचितप्रशस्तशास्त्रगोष्ठीसुधापाने । आद्या द्वैधा अपि चाधिचक्रिरे तत्र सूरिभिः, परं द्वितीयाः साध्यव्या-
धिव्यथितांगभाज इव प्रधानतरौषधविधानेन यथाप्रस्तावमहंकारनिराकरणविषयोपदेशलेशेन प्रतिबोधनीया इति ।

अथैतेषामन्यतमभाग्योपलभ्ये संगमे समुपजाते सति यथोचितवचनादिप्रतिपत्तिपूर्वकमेवं स्याद् गोष्ठी । तथाहि ।
आगम्यतां भोः कोविदकुलावचूल अलंक्रियतामिदमासनं, किंचित्कलयथ प्रतिकलमतुलकुशलकमलाक्रीडक्रोडासंक्रीडने
भृंगभूयं यूयं, प्रामोमोदीदद्य शुभवतां भवतां कलावतां दर्शनेन सद्योऽस्मच्चित्तचकोरः । उल्लसत्येव हि कलावतः समुदये
अमलगुणरत्नरत्नाकरः । दुर्लभो हि धर्म्मव्रततिवितानोच्छेदकरालकरवाले बहुलदोषजालेऽस्मिन् कलिकाले विमलगुणमं-
डलाभरणभारिणां परमसौजन्यधारिणां दुर्गस्वर्गापवर्गमार्गप्रचारिणां अनवद्यविद्याविलासामराचार्यानुकारिणां सुविचारिणां
सदाचारिणां संगमः । गमयत्येवायमनुत्तरो ह्युत्तरोत्तरोत्तमानेकगुणविवृद्धिहेतुः सेवधिरिव विधिवद्गुणिजनसन्निधिः परमसु-
खसंपदां पदं विनयादीनां नरं । किं नोक्तं चतुरचेतश्चमत्कारकारिहारिप्रचुरवाक्प्रबंधेन श्रीमता हर्षमिश्रेण सकलकविकुल-

Indira Gandhi National Centre for the Arts

प्रबलमदगदौषधे नैषधे नाम महाकाव्ये तथाहि । प्राणप्रियप्रणयिनीप्रवरगुणगणप्रगुणनप्रकटितप्रणयप्रकर्षं राजहंसावतंसं प्रति प्राह नल ईलापतिः । जृशतापजृता मया जवान् मरुदासादितुषारसारवान् । धनिनामितरः सतां पुनर्गुणवत्सन्निधिरेव सन्निधिः १ ॥ तद्युक्तमेवैतत् सकलकलंदिकाकलनाविकलकौशलशालिनां विमलविनयविवेकाद्यनणुगुणमालिनां शुजवतां जवतां संगमेन यदद्यामंदानंदसंदोहास्पदं जवामहे वयं । किंच जो यः खलु प्रबलकलिकालानुजावप्रसरदोषचक्रवालोच्छलद्बहुलधूलीपटलध्यामलितांतराले सकलेऽपि क्षितिमंमलतले फुर्लजतरमुपलज्यापि प्रथितप्रवीणप्रकरप्रार्थितप्रगुणगुणगणसंगमं गुणिजनसंगमं, तत्तद्गुणानजिज्ञतया गुणिमत्सरितया वा न प्रकृष्टप्रमोदामोदमेडुरतां बिजर्त्ति, स खलु न प्रेक्षाचक्षुषां चक्षुषा प्रेक्षणीयः । यतो गुणानुराग एव मुख्यं लक्षणं वैचक्षण्यस्य, गुणानुरागश्च गुणवत्प्रेक्षणक्षण एवाक्षुण्णप्रमोदप्रकटनेनैव लक्ष्यः खलु दक्षैरक्षोदीयान् ॥ नागुणी गुणिनं वेत्ति गुणी गुणिषु मत्सरी । गुणी च गुणरागी च विरलः सरलो जनः १ ॥ तदद्य बंधो कृतकृत्याः स्मोऽनज्रवृष्टिन्यायेनोपपन्नगुणवतां जवतां संगमेन । परं पीयूषेनेव तोषयितुमिछामः श्रवणौ जवन्निवासावासग्रामग्रामणीग्रामनामसंश्रवणेन । कुतो वा विपुलविपुलामंमलमंडलाखिलमंडलमंडलाखंडलाडंबरान्मंडलादत्र युष्मत्समागमः ।

अथ हंहो धीधन कैः २ प्रशस्तशास्त्रशस्त्रैर्निहत्य निखिलप्राणिप्रकरप्रेष्यताप्रदायिप्रसरद्विक्रमक्रमोऽेकजाजं मोहराजं । दक्षिण क्रमध्वे लक्षणे विचक्षणाक्षोदीयोऽक्षूणाक्षामक्षोदं । कस्मिन् वा ऐंद्र १ जैनेंद्र २ सिद्धहेमचंद्र ३ चांद्र ४ पाणिनि ५ सारस्वत ६ शाकटायन ७ वामन ८ विश्रांत ९ बुद्धिसागर १० सरस्वतीकंठाजरण ११ विद्याधर १२ मुष्टिव्याकरण

Indira Gandhi National Centre for the Arts

१३ कलापक १४ भीमसेन १५ शिव १६ गौड १७ नंदि १८ जयोत्पल १९ जयदेवा २० दिव्याकरणेष्वाम्नातिनो भवंतः । कं कं वा साहित्यशर्करारसं स्वादं २ परमानंदपीयूषे निमग्ना भवच्चित्तवृत्तिः । तथा आटीकंते भवंतः सुघटनाटकपेटकाभ्यासपटुपाटवप्रकटनैः स्फुटं नाटयंतः कीर्त्तिनटीं नाट्याचार्यतासंटकं । कैः २ अलंकारवारैरलंकारवारैरिव अलं समलंकृतं भवद्वदनं । आस्ते तावत्कर्कशतरतर्कवितर्कसंपर्ककर्कशधीत्वं । केषु २ वा जैनजैमिनिसुगतकणभक्षसांख्याक्षपादादिमतसंबंधिनानातर्कग्रंथसंदर्भेष्वधीतिनो यूयं । केषु २ चापरेष्वपि निश्छद्मछंदोज्योतिःप्रभृतिप्रशस्तशास्त्रप्रकरेष्वधीतिनो भवंत इति ।

धीमन्, युक्तमेवैतत् भवादृशां विशुद्धबुद्धिस्पृशां सम्यक्सारेतरवस्तुदृशां चारुचारिमोदारवर्यचातुर्यचमत्कृतचतुरविशां, यदेवं तेषु २ ग्रंथेषु क्रोडीकृतभ्यासः सदभ्यासः । किल शास्त्राभ्यास एव हि सारमसारसंसारे । तद्वतामेव यत्र तत्र तत्रभवतादर्शनात् । किंच । अस्तमीयिवांसः खलु ते त्रिभुवनभवनाभोगभासिनः सकलजगज्जंतुजातामितैकांतहितानुशासिनः प्रध्वस्ताशस्ततिमिरनिकराः सर्वज्ञदिवाकराः । अचकलच्चाविकलं सकलेऽपि क्षितितले कलिकालकालप्रदोषः स्वविलासकरालताप्रागल्भ्यं । अथच । प्रासरिसारिषुः सर्वतोऽप्यनिवारप्रचाराः प्रचुरतरतिमिरप्राग्भाराः । अबोभवुश्च दक्षैरप्यलक्ष्यया विशिष्य मोक्षपुराध्वानः । एवंच सति प्रशस्तशास्त्रप्रदीपा एव प्रगल्भायंते प्रदीप्रा जगति दुर्गापवर्गमार्गोपदर्शकतया । किंच । बाह्यांधकारनिकुरंबमात्रोपसंहारकारिणः सहस्रकिरणादप्यतिरिच्यते ह्येष निर्विंक्रोष्यबाहीकांतरतिमिरनिकरापहारकारी शास्त्रविसरः । तथा परिदृष्टपुष्टालोकादिविशिष्टपरिस्थूराविदूरार्थसार्थावगमनालंकर्म्मीणे लोचने अप्यवगण-

Indira Gandhi National Centre for the Arts

यत्येतदतींद्रियेतरवस्तुव्यतिकरप्रबोधप्रत्यक्षं शास्त्रमंक्षं । किंच । महाचित्रनिधिरयं शास्त्रकोशो विधिवत्प्रदीयमानोऽपि यो विचक्षणैर्दक्षिणशिष्येभ्यो न कदापि क्षयितां शिक्षते, परं सुरक्षितव्य एव खद्वमर्यादप्रमादादिदस्युभ्यः । तस्मान्निरंतरं प्रमादपरिहारेण तदवबोधप्रसाधनावधानानुसंधानविधानैर्भाव्यं विबुधधुरीणैः । तैर्विना अपहेयोपादेयोपेक्षणीयवस्तुनिकरव्यतिकरे तत्तत्फुदर्कोपलंभकतया, तथा २ विवेचनैकविकलत्वेनाक्षय्यमोक्षसौख्यादेः प्रापकत्वेन स्वहितस्य सम्यग्ज्ञान-क्रियादेः प्रसाधयितुमशक्यत्वात् । नच तान्यप्रयत्नोपलभ्यानि, तत्तत्प्रसाधनप्रधानसाधनसन्निधानविधानं विना तदध्ययनसाध्यस्यासिद्धेः । तत्साधनानि च विशुद्धबुद्ध्याभोगः १, सद्गुरुसमायोगः २, सद्गुरुविनयप्रयोगः ३, पुस्तकप्राप्तियोगः ४, प्रमत्ततावियोगः ५, सततोपयोगः ६, शुद्ध्यभियोगः ७, देहारोग्य ८, भाग्या ९ दीनि । दुरापाणि चैतानि । यतो जगत्कर्ममर्मवशादधर्माशर्मबाहुल्येऽस्मिन् कलियुगे प्रतिक्षणं प्रहीयमाणप्रधानमेधादिबलत्वेन क्व तावान् प्राचीनमुनींद्रचंद्रशेमुषीविशेषानुयायी विशुद्धबुद्ध्याभोगः । अगण्यपुण्यप्रचयपरिपाकिमहिमोपलभ्यः खलु समग्रग्रंथार्थप्रबोधपटिष्ठविशिष्टतरामितहितनिधिश्रीमद्गुरुसमायोगः । तथा विकुत्स्यातुच्छम्लेच्छादिकुनृपतितिविध्वस्तानेकवलभ्यादितत्तन्महानगरस्थानेकलक्षप्रमाणागमादिसदादर्शोच्छेदेन कौतस्कुतस्तावदज्ञानांधकूपप्रपतत्प्राणिप्रतिहस्तकप्रायप्रशस्तपुस्तकप्राप्तियोगः । तथा तत इतो दृश्यमाननिरुपमानमिथ्याभिमानाविरामाद्युन्मत्तकुनयोपचयप्रधानकुभूपतितत्पत्तिगृहीतोग्रविग्रहाग्रहग्रहोद्यत्प्रमादानाभोगरोगाद्यनुमेयाभाग्यादिधुर्येऽत्र कलियुगेऽतिदुरापाणि तथाविधस्वास्थ्याप्रमत्ततोपयोगाभियोगारोग्यभाग्यादीनि । ततश्चैवं दुरासदान्यप्यासाद्य कथमप्येतानि नाधीयीरन् ये विधिवन्निरवद्या विद्याः, वंचितः खलु

तैरविबुधधुरीणैः स्वात्मैव तदुच्चोच्चश्रेयोन्यः । अधीत्यापि च ये शास्त्राणि सततानवधारणेन वृद्धिविधुरतया विदधीयेरन् तदनुक्रमाद्धानिभांजि सुशास्त्राणि, ते च समधिकतरं स्वात्मवंचनेन वंचनीयतामंगीचेक्रीयंते । त एव हि धन्याः, प्रबुद्धजनमनोमान्या, ये विधाय विधिवत् शास्त्राध्ययनं पुनस्तदवधारणादिना प्रतिदिनं विवृद्धिमेव दधति तानि विदध्युः । तद्विवृद्धिश्च प्रायः पटुतरतदभ्यासव्यासप्रयाससाध्या, सोऽपि प्रायस्तद्विषयोत्साहपूर्व इति प्राहुः प्रबुद्धाः । एषोऽपि गुणिजनप्रष्ठैः श्रेष्ठगोष्ठीविधानदधद्रूढिमानमुपलभ्यते । अतो बहुगुणत्वादेषापि ज्ञानादिगुणप्रकर्षप्रापकतया परंपरया साधनमेव जेगीयते श्रेयोमार्गस्य । तेन यथासमयमेतामप्यादरिदारिषुर्विदुराः श्रीसर्वज्ञोपज्ञसज्ज्ञानोत्साहादिगुणोपचयहेतुमिति । यत उच्यते “ज्ञानोत्साहो गुणावाप्तिः प्रागल्भ्यं बहुदर्शिता । तत्त्वबोधः श्रुतावाप्तिः साधुगोष्ठीगुणा ह्यमी । १० । किंच । इयमेव स्वमधुरिमविधुरितोर्ध्वाधोलोकाधारसुधाभिमाना वसुंधरावलये विचरद्विबुधततितुष्टये प्रभवति । अतः पापीयध्वं क्षणं । दक्षिणाऽक्षुण्णक्षणप्रायं सममस्माभिरचतुरवचनप्रपंचश्रवणोद्भूतप्रभूततापापहारप्रवणं त्रैवैद्यगोष्ठीपीयूषयूषपूरं ।

अथ केचिदहंकारमषीशितिमानमात्मन्यादधतो न दरीधर्ति तथाविधोज्ज्वलगुणानुरागं । ते चैवमखर्वगर्वाध्मातमानसा न तामर्हंतीति तान् प्रत्युपदेशलेशः प्रपंच्यते । तथाहि । तथाविधमवसरमुपलभ्य विद्वन् कथंकारं भवद्धृदयगुहायामुद्यद्भास्वरकरनिकरप्रचारेऽपि क्वचित्तत्तद्वचनान्यथानुपपत्त्यनुमेयापहेयाहंकारांधकारप्रचारः । विमरीमृश्यतामचिरस्य मोहस्य लास्यं । किं युज्यते भवादृशामपि प्रेक्षादृशां हृदयेष्वंतरुद्यद्भास्वप्रकरध्वांतारातेः किंचिद्वस्तुतत्त्वानवबोधावरणमनुमापयदहंकारशार्वरं । किंच अंतर्ज्वलद्विनयनयविज्ञानादिगुणतृणभरोद्भूतप्रभूतजाड्यज्वलनमनुमेमीयंते तदन्यथानुपपन्नायाः

Indira Gandhi National Centre for the Arts

सर्प्पद्दर्पोद्दामधूमस्फीततया दर्शनेन प्रबुद्धाः । आः किमिदं हतविधेर्विंततखलितमिदं, यद्विवेकिनराणामपि बुद्धितरुष्वेवं गर्वगुर्वविवेकातिरेकोदकप्रकरनिषेकः । पुरापि के के ह्येकेनाप्यनेकाविवेकोत्पादकेनानेन छेका अपि नैकलोकनिकायाः कानि २ नाचरिकारयिषताऽकृत्यानि, कृत्यानि वा कानि २ न व्यसरिस्मारयिषत् स्मयेनानेन विस्मयस्फीतताधायिस्फुरत्तरस्मृतिनदीस्रोरपि, तन्नूनं विधेरेवेदमवंध्येच्छाप्रागल्भ्यं परिपोस्फुरीति, तेषु २ पदार्थेषु उपपनीपद्यमानानामनुपपनीपद्यमानानां वा तत्तत्तद्गुणागुणानां तथा २ नियोजने वियोजने वा प्रत्यलं, यन्नवाद्दशेषु विमलविद्याजलप्रधौतावदातहृदयेष्वप्येवमहंकारमषीकूर्सिमावलिप्तता । तथाचावावादीत् श्रीहर्षः कविमचर्चिका । अवश्यज्जव्येष्वनवग्रहग्रहा यया दिशा धावति वेधसः स्पृहा । तृणेन वात्येव तयानुगम्यते जनस्य चित्तेन भृशावशात्मना ॥१॥ अथवा कोऽयं विधिर्नाम। का वा तस्येच्छा, किंवा तया सेषिद्धेत । पुरुष एव हि अनवगतत्रयीतत्त्वतया स्वस्वरूपविवेचनादिविकलः सत्कृत्येषु गजनिमीलकाद्यवलंबी प्रमादानाभोगादिकुमित्रसंपर्कवशादवितर्क्यैवोदर्कं तत्तदसत्क्रियाप्रवृत्तस्तत्तद्दुःखफलोपभोगभाजनं बोभूयेत । स एव च यदा श्रीसर्वज्ञोपज्ञप्रशस्तशास्त्रोपदेशप्रदीप्रप्रदीपोपलब्धसमस्तवस्तुसतत्त्वतया सम्यग् विविच्य तद्गुणागुणस्वरूपं तदुपादानहानयोः प्रयायत्येत, तदा समासादयत्येवायमुत्तरोत्तरतत्तच्छुभफलभरभ्राजिष्णुः क्रमात्परमपदसंपदमपि ॥ यदुच्यते । तावत्कलयति पुरुषो हतविधिखलितोच्छदुःखसंघातं । चिंतयति नेति यावत्कोऽहं किं मे हितं चान्यत्॥१। इति च विविच्य विबुध्य च हिताहितप्राप्तिहानियत्नवतः । सा नास्ति कापि संपत् लुठति न या करतले तस्य ।२। अतः परिज्ञातज्ञेयगुणागुणगरिमाणो विचारचारिमाखंडपंक्तिमानश्च विचारयंतां स्वचेतसा, किं चतुराणां चेतश्चमत्कारकारी स्यात् कदापि चेक्रीय्यमाणो-

ऽयमवलेपः । किंच । इह हि दुरंते कलिकालविलासे विस्फुरत्प्रबलमोहनृपालकुतूहलोत्तालबलोच्छलत्कोलाहलोच्चालिताखिलमंजुलोल्लासिबहुलगुणचक्रवालाकलितवित्रासे कुतस्त्यं तावन्निरवद्यहृद्यचातुर्वैद्यवैशारद्यं । नहि कोऽप्येवंविधः पुरुषविशेषोऽत्र समीक्ष्यते, यः किल कलयत्यविकलं सार्ववैद्यावबोधविशदिमानं । यतो गलंत्येव हि प्रतिकलमधुनातनेषु तमोजनेषु सच्छिद्रभाजनोदरपूरिपूर इव शुश्रूषाश्रवणग्रहणधारणोहापोहार्थविज्ञानतर्कविज्ञानतत्त्वज्ञानलक्षणा अमी मनीषागुणाः । गलत्सु च तेषु तदग्रिमनिदानानि विधौ प्रधानानि विद्यानिधानान्यपि परीस्पृशत्येव हि क्रमेणापहानिपदवीं । एवंच क्रमेण हीयमाने विद्यासौंदर्ये सांप्रतकालीनेषु जनेषु ज्ञानलवा एव परिपोस्फुरति । तथापि योऽचतुरचेतस्को विद्याघ्रातमात्रतयैवाऽमानाहंकृतिभाजनमानुषंगरंगदंगसंसर्गी संजायते, नार्हत्येवायमप्रतिमप्रामाणिकश्रोत्रियपरिषदि प्रवेशं । भवते च स खद्वदृष्टाश्रुतस्वीयज्ञानाणुताप्रदायिपुरातनानेकमौनींद्रवृंदोदारचित्रचरित्रः कूपमंडूक इव बहुश्रुतसदस्सु हास्यास्पदत्वमिति । ततो विचक्षण समीक्षस्व क्षणमांतरचक्षुषा, कस्ते नाज्ञानातिशयो, येनैवं दुर्धरदर्पोद्धुरकंधरीभवसि । धीमन् नयस्व क्षणमेकं स्वीयमानसं स्थिरस्थेमानं । अवधारय वैबुध्यधुराधरणधीरोदारपुरातनानेकमुनींद्रचंद्रोदग्रविद्याशक्त्यादिसौंदर्यं ॥ तथाहि इह हि अहमहमिकाऽवनम्रकम्रनिःशेषवृंदारकासुरनिकरेश्वराखिलविपुलावलयप्रौढपरिवृढश्रेणिशीर्षावलीशेखरासंगिरत्नोत्करोल्लासिरश्मिमंडलीमिलदविरलपदयुगलनखोन्मिषत्सिंदूरपूरारुणरुचिरोचिर्निकरकर्बुरितांबरोदरश्रीमज्जिनपतिगदितोत्पादव्ययध्रौव्याद्यनंतधर्मात्मकाशेषजगद्व्यवस्थाप्रकाशकामलपदत्रयीसमाकर्णनानंतराविर्भवत्प्रतिभाप्राग्भारप्रकर्षप्रबुद्धाशेषभुवनांतर्वर्त्तिपदार्थसार्थोपनिषद्याथातथ्यगणधरपदवीप्राप्तप्रतिष्ठश्रीमद्गौतमप्रभृतिगणपतयोऽतमुहूर्त्तमात्रकालेन चराचरोद-

Indira Gandhi National Centre for the Arts

रविचरन्मोहांधकारसंभारसंहारोद्यत्तरुणतरणिकरनिकरानुकारिभिः शेषज्ञेयोपनिषत्परिज्ञाननिधानप्रधानतरानंतार्थाऽक्षय्यकोशात्मद्वादशांगीयशःस्तंभसमुत्तंभनं विरचयांचक्रुः, तेष्वेव व्यलासीद्विश्वत्रयानुत्तरावबोधसंपत् । तदनु पुनरवलंबिततरतमभावप्रज्ञाविभवाद्बहवोऽप्यभूवन्नित्यादिप्रज्ञाप्रकर्षप्रतिहताशेषबुधंमन्यविद्याखर्वगर्वसर्वस्वाः सद्दक्षुभिक्षुक्षितिपतयो यतिपतयः । ये हि किलैकपदश्रवणतोऽप्यविकलं कलयांचक्रुर्ग्रंथकोटीकोटीरपि । कः खलु परिमितजीवितैकजिह्वो निजशेमुषीसमुन्मेषैः सुरगुरूयमाणोऽपि कोष्ठकबुद्धिबीजबुद्ध्याद्यनेकप्रकारप्राचीनप्राज्ञप्रज्ञामहिमानं प्रथयितुमलं । तथा चतुरचेतश्चमत्कृतये केषांचिदुच्यते । तथाहि ।

विलेसिवान् चिरमनिवारप्रचारोद्यद्वादिदर्पांधकारसंहारदिवाकरकरनिकरप्रतिमवाग्विलासः श्रीसिद्धसेनदिवाकरो नाम सूरिवरः । यस्य किल समारूढस्य प्रौढवादरणांगणे प्रज्ञैश्वर्यादिगुणसदःसदःपतिप्रतिभाधारणाबाहुश्रुत्यक्षांतिमाध्यस्थ्यादितत्तद्गुणग्रामरमणीयानेकसभ्यावलीसमक्षमक्षोदीयोऽक्षुण्णक्षोदक्षमानल्पविकल्पकल्पिताकल्पजल्पकेलीकलामाकलय्य मषीविलिप्तवदना इव प्रत्यग्रपराभवाविर्भावप्रभवत्विषादासादनोदितश्यामलिमानः पंचाननरावसंश्रवणादिव जलधरधोरणीधौतांजनगिरिगरीयःसोदरोद्धुरसिंधुरपरंपरेव त्रस्नुः सर्वतोऽपि प्रचंडपांडित्यपाटवाखंडवाग्डिंडिमाडंबा (बरा) अपि प्रतिवादिसंदोहाः । यः किल भगवान् स्वीयौन्नत्यप्रकर्षामरगिरिगरीयःशृंगप्रस्पर्द्धिऋद्धिजिनालयश्रेणिशिखरशिरोऽसंस्थितादभ्रकिंकिणीजालनिक्वणव्यतिकरवाचालिताऽखिलदिक्चक्रवालप्रचलदुज्ज्वलोद्यद्विपुलपताकावलीसंकरोच्छिन्नखरकरनिकरप्रचाराविर्भवत्तापसंभारायामुज्जयिनीमहानगर्यामपहृतहरगिरिगुरुशेखरौन्नत्यमदगरिमोन्मादे महाकालाभिधप्रासादे श्रीमद्देवाधि-

देवानुपमस्तुतिविरचनवशात् प्रस्फुटच्चंद्रचंद्रीशालिंगोल्लखंडांतराविर्भूतायां श्रीमज्जिनपतिप्रतिमायां चमच्चेक्रीयमाणचित्ताऽक्रमाक्रांतदिक्चक्रविक्रमोल्लासितश्रीविक्रमादित्यभूपतिप्रभृतिप्रवीणततिविततसदसः श्रीमद्देवाधिदेवानणुगुणप्रख्यापनपूर्वं तत्त्वत्रयीप्रबोधप्रदानेन प्रभावयांचकृवान् श्रीमज्जिनशासनं, सुरगुरुरप्यचतुर एवैतस्य गभीरतरार्थानंदिसकलतार्किकचक्रचूडामणिपरिषत्संमत्याद्यप्रमग्रंथरत्नोत्करप्ररोहरोहणगिरेरित्यादिविशदावदातविवर्णने ॥

तथा पवित्रयांबभूव क्षितिवलयं सूरिवरः श्रीमल्लवादी नाम महावादी । यस्य भगवतोऽनतिशैशववयसोऽपि क्षपिताशेषविपक्षक्षितिभृच्छिलादित्याभिधप्रौढप्रतापशालिमेदिनीवासवोदारसंसदि प्रक्लृप्ते षण्मासावधिवादमहासंगरे निर्जितदुर्ज्ञायोर्जस्विप्रतिभाप्राग्भारालयाखिलसौगतावलीप्लुष्टगरिष्ठयशःप्रकराविर्भूतायशोंगारगणप्रसंगसादितप्रवरस्थिरतरतागुणो यशोभरघनसारः सुरभयामासिवान् त्रिभुवनभवनोदरं । अद्यापि हि यत्प्रभवं नयचक्राख्यग्रंथचक्रं समुच्छिनत्ति प्रसरद्दुर्वादिदर्प्पचक्रं ॥

तथा उपचक्रे भगवान् अपारसंसारपारावारपरिमज्जज्जंतुजातमविकलकरालकलिकालविलासेऽपि त्रिभुवनभर्तृश्रीमज्जिनपतिगदितानवद्यनिःश्रेयसाध्वप्रदर्शनेन कृतत्रिभुवनभद्रो हरिभद्रो नाम सूरींद्रः । यतः क्ष्माधरगुरोः प्राप्तप्रभवा सललितबहुलविमलाबालनिष्प्रतिमोदाराव्यर्थसदर्थसार्थाक्षुण्णाक्षरनिकरनीरपूरनिरंतरा, क्वचिद्विरचितातुल्यमात्सर्यालयाशेषपरप्रवादिप्रभवानेककर्कशतर्कसंपर्कप्रतिघातार्थोपस्थापितनिष्प्रतिमोत्तमोत्तमयुक्तिव्यतिकररत्नोत्करकरंबितांतरा, क्वचिद्दुर्दंडदंडककदंबकप्रोच्छलद्भवखाऽमललोलकल्लोलमालोत्पतत्सीकरप्रकरासारव्ययितत्रिभुवनजनसंतापा, क्वचित्कवलितासारपरप्रवा-

Indira Gandhi National Centre for the Arts

दिग्रथितागण्यानुमानमीनावलीकदुःशकव्यभिचारप्रचारा, असंख्येयाऽध्ययद्धमुख्याक्षुण्णक्षोदक्षमाप्रौढप्रमाणप्रकरप्रसर्पत्तिमिंगिलगिलावलीसंकुलांतराला, क्वचिन्निरवद्योदारहृद्यपद्यावलीधवलविलसन्मरालमंडलीसमाकुलविपुलपुलिनाभोगभोगा, क्वचिदतिगूढप्रौढप्रचुरगभीरार्थसार्थस्वल्पाक्षरानल्पगद्यपद्यावलीविकटपुटभेदपेटकोद्घाटिताकालबालावलीसाध्वसव्यूहा, क्वचिदमृतरसनिस्यंदिश्रवणसुखदानेकग्रथितगाथागणागाधगूढप्रौढहृदसंदोहदुःशकापाठीनाधीवरप्रवेशा, आनंदितसकलसहृदयहृदया, संक्लृप्ताखिलसंश्रितासंख्यविपश्चित्कल्मषविलया, चतुर्दशप्रकरणशतीनिर्झरिणी पवित्रयांचक्रुषी निखिलभूवलयं, येन किलोद्दामवादमहारणांगणे क्षणमात्रादेव प्रतिहतवितताभिमाना धिक्कारकारितत्तत्सभ्यादिवाक्कोटिलकुटतटाघातशून्यीभूतहृदया बौद्धा अपि माध्यमिकाः सतोपि सरलतरतालहिंजलज्वलनसलिलजलधिद्विकलमलावलीरंगत्तुंगतुरंगभृंगकुरंगागारगिरिकांतारहारविहारोदारप्राकारपुरप्रमुखानेकपदार्थसार्थानपश्यंतः शून्यवादित्वमेवोररीचक्रिरे ॥ तथा प्रसर्पद्दर्पसंभारोद्धुरकंधरा अपि प्रारब्धे येन सहोदारवादसंगरे क्षणमात्रादेव समीक्ष्य स्वीयाखर्वगर्वसर्वस्वह्रासं क्षणिकत्वमेवाशेषसंस्काराणां सूत्रयामासुः सौत्रांतिकाः। यस्य हि परमकोटिप्राप्तोदारज्ञानरमया आसादिताखिलभूमंडलाखंडलमंडलीमहनीयमहिमानं समीक्ष्य विज्ञानस्यैव सारत्वं मन्यमाना अखिलत्रिभुवनवलयस्यापि तन्मयत्वमेव शरणीचक्रुर्योगाचाराः। इह हि षड्दर्शनाशेषवादि(त्व)संदोहा यदभिधानश्रवणादपि माद्यन्मदझरनिर्झरिणीप्ररोहोत्तुंगशृंगधराधरानुकारिस्फुरद्गंधसिंधुरोद्धुरगंधप्रकरविधुरितापरसिंधुरधोरणीव विमुक्ताशेषमदोत्कट्या निर्व्याजोल्लसद्भक्तियुक्तीः प्रकटयंतः प्रकटमेव यन्निकटमाटाटिषुः क्रमयुगलवरीवस्याघटनायै ॥

त्रैविद्य-गोष्ठी.

॥ ६ ॥

तथा प्रीणयामासिवानमृतरसनिस्यंदिवाग्विलासै स्वजगतीं निजप्रतिभावैभवाभिभूतदेवसूरिर्देवसूरिर्नाम सूरिः । यस्य किलाशेषवादींद्रशिरःशेखरस्य पृथिवीप्राप्तप्रतिष्ठश्रीसिद्धचक्रवर्त्तिश्रीजयसिंहदेवोदारपरिषदि संक्लृप्तोद्दामचतुरशीतिवाद-प्रतिवादिनिर्जयनोर्जिताखंडपांडित्यरंजिताखिलभूपालचक्रवालप्रदत्तोत्तालमरालमंडलोज्ज्वलचपलचारुचामरश्रेणिधवलविपु-लातपत्रसिंहासनावलीचंगरंगत्तुंगतुरंगकिंकरप्रकरप्रभृतिपरिच्छदापूर्णनिकटतटोत्कटाहंकारसंभारभारितातंद्रकुमुदचंद्राभिधा-नाखिलव्योमांबराखंडलविजयार्जितप्रौढसत्कीर्त्तिनर्त्तकी जगत्रयोत्तुंगवंशाग्रनर्त्तनशीला कुरुतेऽद्यापि सकलसहृदयान् (आन-न्दसमास्कन्दास्कन्दान्) । यन्निर्म्मितानेकयुक्तिव्यतिकरांचितोद्दंडदंडकस्फारवृत्तोत्कराप्रत्नरत्नरत्नाकरस्याद्वादरत्नाकरप्रमुखा-नेकसत्तर्कग्रंथावली कां कां न चमच्चरीकरीति कोविदावलीं ॥

तथा उद्योतयामास श्रीमज्जिनशासनं दुःखमांधकारसंभारसंहारोद्यत्तरुणतरतरणिकरनिकरानुकारिप्रवरवाक्प्रचारः कोविदवृंदवर्यः श्रीहेमचंद्राचार्यः । यस्याविरलविमलवाग्लहरीनाशितानादिकाललीनदुर्निवारविस्फुरन्मोहाहिविषप्रसरः श्रीमद्गुर्जरधराधुराधरणधुरंधरतामादधानः श्रीमत्कुमारपालभूपालः समुद्घोषयामासिवान्निखिलभुवनवलयेऽपि समस्तजग-ज्जंतुव्रातरक्षोद्घोषणेन विलसद्यशःपटहं । यस्य किल कलिकालसर्वज्ञेतिबिरुदानंदितसज्जनमनसः सपादलक्षलक्षणछंदोऽनु-शासनालंकारचूडामणित्रिषष्टिशलाकापुरुषचरित्रयोगशास्त्रप्रमाणमीमांसाप्रमुखानेकसत्तर्कग्रंथग्रथनानुकंपिताशेषविशेषविशे-षज्ञस्य वैदुष्यविशेषव्यावर्णने किं ब्रूमः समधिकं मूढतारूढचेतोवृत्तयो, निखिलत्रैलोक्यवंदनीयपादारविंदयुगला भगवती शारदापि न देधीयते सामर्थ्यं ॥

॥ ६ ॥

Indira Gandhi National Centre for the Arts

कोविदोत्तंसा बहवोऽप्यभूवन् विविधज्ञानादिगुणगुरवः श्रीमद्गुरवः । न खल्वेतेषां गुणपारावारपरपारं प्राप्नुयाद्वर्षसहस्रैरपि कश्चित्परं नैकोऽप्येतेषु कश्चिदहंकाराद्यनघगुणकालुष्यकलुषितमात्मानं बभार । हंत तर्ह्येतदपेक्षया कः खलु ज्ञानातिशयः सांप्रतकालीनानां जनानां ॥ किंच । एतन्निष्टंकितमिह जानीहि । यत्राहंकारांधकारप्रचारो, न तत्र निर्म्मलज्ञानदिनकरकरप्रचारः, विद्याहंकारयोः सहानवस्थानस्वभावविरोधविधुरत्वात् । एकतरसंभवे इतराभावस्य स्पष्टनिष्टंकनात् । कुत्रचिदहंकाराभावेपि विद्याविरहदर्शनेन नात्र व्यभिचारचौरप्रचारः शंकनीयः । तत्र तदुत्पादकाध्ययनादिसमग्रकारणाभावहेतुकोदारविद्यानुपलंभेपि तद्योग्यताया विद्यमानत्वात् । नच वयं निरहंकारत्वमेव सर्वथा विद्याहेतुं ब्रूमः, तदन्येषामप्यध्ययनादितद्धेतूनां विद्यमानत्वात् । नच विद्यारूपस्वकार्योत्पादनासमर्थत्वात्तस्य तद्योग्यताया अप्यभाव, इति वाच्यं । तदन्यकारणाभावनिमित्तकत्वात्तदनुत्पादनस्य । नच मुख्यहेतुसंभवेऽप्यपरहेत्वनपेक्षं कार्योत्पादः संभवति, तेषां तदनिदानप्रसक्तेः । यो यदभावेपि भवति, न तत्तस्यकारणं । घटस्येव तंतवः । तन्नैवं तत्र तद्योग्यताभावः साधयितुं शक्यः । नचैवं साहंकारस्यापि तद्योग्यता भवत्विति चिंत्यं, तस्य कदापि तददर्शनात् । अथाचक्षीथाः प्रत्यक्षमृषावादित्वमेतत् । यदहंकारिपुरुषव्रातानां संतमपि विद्याप्राग्भारमपह्नुध्वे । दृश्यंते हि बहवोपि सुधियोऽप्रमाणोन्नताहंकारशिखरिशिखरमारूढचेतसोऽपि विद्यावैशारद्यापहृतसहृदयहृदयाः इति । तदेतदज्ञानमदिरापानविह्वलचेतसां प्रलपितं । तत्पुरुषाणां चातुर्वेदस्य विद्यात्वायोगात्, तदयोगश्च तत्फलविरहात्, विद्या हि ज्ञानमुच्यते, तस्य चानंतरफलं कुमार्गविरत्यादि, सन्मार्गासेवनादि च। तथाचोक्तं ॥ ज्ञानस्य फलं विरतिरित्यादि। तथा "तज्ज्ञानमेव न भवति यस्मिन्नुदिते विभाति रागगणः ।

तमसो हि कुतः शक्तिर्दिनकरकिरणाग्रतः स्थातुमित्यादि । अहंकारस्य रागादिविनाशावित्वात्तत्वतस्तदभेदाच्चेति । नचाहंकारः सन्मार्गस्तस्य भवहेतुत्वात्, शिष्टनिंदितत्वाच्च, आखेटकादिवत्, इति सिद्धं यत्राहंकारघोरांधकारप्रचारो, न तत्र ज्ञानदिनकरकरविहार इति दर्प्पापाकरणं ॥

अतः परित्याज्योऽयं सर्वथा प्रशस्यश्रेयोमार्गाराधनप्रधानसाधनानवद्यविद्याविशारदिभिः साभिलाषिभिरवलेपाक्षेपः । विधेयोऽनवरतमप्रतिमगुणानुरागसंगः, उपार्जनीयाश्च सम्यग्ज्ञानविनयनयविवेकादिगुणनिकराः । यतो गुणा एव दुष्प्रापाः प्रबलकलिकालविलासानुभावस्फुरद्दोषजालबहुलेऽत्र क्षितितले, गुणवानेव च त्रिविष्टपेपि विशिष्टजनेषु स्पष्टप्रतिष्ठास्पदं जंजन्यमानः समीक्ष्यते दक्षैः । यतो गुणाः सर्वत्र पूज्यंते । तथा गुणवंतमेव हि वरीवृणीयुरहमहमिकया निरस्तापदस्तत्तत्सकलसंपदः, ऋद्धिसमिद्धा अपि दुर्लभतरगुणवच्चरणपरिचर्यालालसमानसाः सर्वतस्तदभ्यासदेशालंकरणं बोभूयेरन् । अप्रार्थिता अपिच तद्गुणप्रकरप्रेक्षणप्रहृष्टमानसा निर्व्याजभक्तिभावितांतःकरणतया गुणभृत्पदयुगलं स्वमौलौ मौलिलीलामवलंबयेयुः । स्वभावादेव च प्रथयंति कविप्रकांडगंधवाहा दिक्षु विदिक्षु च गुणवद्भूरीयोयशःकर्पूरपूरसौरभप्रथिमानं, यतो नहि विकसत्तरमंभोजन्म अधर्म्मकर्म्मकृज्जन्मवद्भवलक्षचक्षुरनध्यक्षलक्ष्म्याः स्वस्मिन्निवासाय प्रार्थनाचाटूनि घटयदुपलभ्यते । किंतु गुणगरिष्ठश्रेष्ठस्थानतया तत्रैव वावसीति सा । नचापि राजद्राजीवराजी रणरणकारकारिमधुकरनिकराकारणाय क्वचनाप्यरियरीति । किंतु स्वयमेव तद्गंधसौरभलोलुपास्ते मधुपा गायंत इव तद्गुणनिकरान् झणझणाकारिरावप्रकारैः परिवरीवृतः सर्वतः तदलंकरणभूयं संप्रतिपनीपद्यंते । अनभ्यर्थिता अपि च स्वस्यैवोद्यद्भोभाविशेषस-

Indira Gandhi National Centre for the Arts

मुन्मेषाय तथैवार्हतया नरविसरोत्तमा अपि निवेशयेरंस्तां निजोत्तमांगभागे स्वेनैव च वितंतन्यंते तदंधसौरभ्यपूरं सर्वतो दिगुदरविवरेषु गंधवाहाः । तस्माद्गुणानेवेह बंहीयोमहिमप्राग्भाराऽप्रतिहननहेतुतया निरूपयामः खल्वपि । किंच । वचनमपि गुणवन्मुखादेव समुत्थितं सम्यगादेयतामादधानमादेद्रीयंते विबुधधुरीणाः । तथाचावादिषुर्विद्वुराः । क्षीरं भाजनसंस्थं न तथा वत्सस्य पुष्टिमावहति । आवल्गमानशिरसो यथा हि मातुस्तनात्पिबतः ॥ १ ॥ तद्वत्सुभाषितमयं क्षीरं दुश्शीलभाजनगतं तु । न तथा पुष्टिं जनयति यथा हि गुणवन्मुखात्पतितं ॥ २ ॥ तस्मादनणीयः श्रेयःसाधनप्रगुणगुणानुरागादिगुणोपार्जन एवाहितावधानैर्भवितव्यं स्वहितैषिभिर्मनीषिभिः । त एवचार्हति श्रेष्ठ शिष्टगोष्ठीमपि । तेनाथ अर्हथ प्रथीयःसद्गुणानुरागासंगितया यूयमिदानीमिमां । वयमपि च सम्यगुपासितश्रीगुरुचरणसरोजाऽप्रतिमप्रसादादधिकारिण एवात्र । यतो द्रढीयोद्रढिमजडिमप्रचंडिमावष्टब्धचेतस्का अपि श्रीमद्गुरुवदनोद्गच्छद्वचनप्रपंचोद्यद्दिनकरकरनिकरप्रतिहतांतरतमःपटलपटिमतया समबोबोधिष्टाद्योदीयोलक्षणाप्रतिमप्रमाणछंदोऽलंकृत्यादिप्रशस्तशास्त्राणि । यतो नास्तीह तत्किंचिदवद्यं, महतां चरणपरिचर्यापि यत्पाटने न पटु पटिमानं प्रकटयति, घटयत्येवेयं दुर्घटोत्कृष्टविशिष्टश्रीघटानामपि संटंकं । विघटयत्येव च स्फुटं कटतटानीव घटपेटकं विकटतरदुरितकोटीरपि । सामान्यजनेष्वपि किंचिद्गरिष्टपुण्यस्तवविमवशात्तुष्टिपुष्टिमुपगताः श्रीगुरुपादा जायंते एव जगज्ज्येष्ठस्त्रेष्ठसंपत्साधनपटिष्टाः । यदुक्तं । गुरुयाणं चलणसेवा न निष्फला होइ कइयावि । ततः सुखेनैव तथाविधधिषणासाधिमविधुरा अपि श्रीमद्गुरुगुरुप्रसादमध्यासीना अध्यगीष्महि, अधीमहे चाद्यापि विशुद्धबुद्धिप्रबोध्यमेध्यशास्त्राणि । तथा तत्तद्वस्तुव्यतिकरेषु तत्त्वातत्त्वविचारणचतुरचेतोवृत्ति-

तामपि प्रतिकलं कलयामः । नहि श्रीमद्गुरुप्रसादकल्पद्रुमप्रभाववैभवस्येयत्ता कापि समस्ति । तथा स्वभावात् श्रीगुरूपदेशाच्च गुणवल्लेक्षणप्रदर्शिणोपि वरिवृत्मः । तथाशविधबुधप्रष्ठप्रेष्ठवरिष्ठगोष्ठीरसिकस्वांततामपिदेध्रीयामहे । अतो युक्तिमत्येव संप्रत्यावयोरेषा शास्त्रगोष्ठी । ततो विधीयते क्षणं । परं सा किमद्भुतलक्षणानुगामिनी । उत साहित्यसौहित्यानुसारिणी । कर्कशतर्कानुयायिनी वा भवद्भ्यो रोचते । लक्षणानुगामिनी चेत् तदा संप्रति सकलेष्वपि लक्षणेषु श्रीसिद्धहेमचंद्राभिधानमेव प्रधानतया वावदति तद्विदुराः अतस्तदाश्रित्य प्रेर्यते किंचित् । वावत्त भोः । अधीये इति त्याद्यंतं इङ्क् अध्ययन इति धातुमंतरेणापि कथमपि सिद्ध्येत् ॥ सिद्ध्यत्येव भोः धीङ् च अनादरे ह्यस्तन्या । ६ दिवादेः श्ये (सि३-४-७) इति सुस्पष्टमेव । तथा उचच् समवाये इत्यनेनोच्यतीति, घ्रा गंधोपादाने इत्यनेन व्याघ्रा इति । तथा । जागर्त्तीति जागृक् निद्राक्षय इत्यनेन । तथा गृत् निगरणे गर्हितार्थे यङि तल्लुपि द्विर्त्वे ह्रस्व (सि ४-१-३९) इतिह्रस्वे ऋतोऽत् (सि ४-१-३८) इति ऋकारस्याकारे गहोर्ज इति (सि ४-१-४०) गस्य जत्वे आगुणेत्याकारे (आगुणावन्यादेः ४-१-४८) तिवि गुणे चैवमपि सिद्ध्यति इत्यादि त्याद्यंतानि विचित्राण्यपि चित्रकराणि सेपिद्ध्यंते, कियंति वक्तुं शक्यानि । तथा पंच षष् इति व्यवस्थापिते पंच च षट् चेति विग्रहे प्रमाणीति (७-३-१२८) डे अंत्यस्वरादिलोपे पंचषानाचष्टे इति णिज् प्रत्यये अंत्यस्वरादे (७-४-४३) रित्यंत्यस्वरलोपे क्रियार्थत्वा (३-३-३) द्धातुत्वे क्विपि अग्रे हलशब्दे पंचषां हलानीति समासे धुटस्तृतीयः (२-१-७६) इति षो डत्वे ततो हश्चतुर्थ (१-३-३) इति ढत्वे पंचढ्लानीति सिद्धिमध्यास्ते । तथा उच्यतां विचार्य क्षणं स्वचेतसा, कस्यधातोः परस्परासंपृक्तानि त्रयोदश रूपाणि सेपिद्ध्येरन् । वावच्मो

वा गिरतेरवपूर्वादवात् (३-३-६७) इत्यात्मनेपदे अद्यतनी ध्वमि सिचि प्रत्यये सिजाशिषोरात्मन (४-४-३६) इतीडागमे सो धि वेति (४-३-७२) सिचो लोपेऽडागमे चोपसर्गाकारेण दीर्घत्वे नामिनो गुणो (४-३-१) वृतो नवेति (४-४-३५) पक्षे इटो दीर्घत्वे अवागरिध्वं १ अवागरीध्वं २ नवा स्वर (२-३-१०२) इति लत्वे अवागलिध्वं ३ अवागलीध्वं ४ हांतस्थाञ्जीड्भ्यां वेति (२-१-८१) पक्षे ढत्वे अवागरिढ्वं ५ अवागरीढ्वं ६ अवागलिढ्वं ७ अवागलीढ्वं ८ तथा स्वरग्रहे-त्यादिना (३.४-६९) ञिटि नामिनोऽकलिहलेरिति (४-३-५१) वृद्धौ अवागारिढ्वं ९ अवागारिध्वं अवागालिढ्वं ११ अवागालिध्वं १२ इडभावपक्षे च ऋतां क्ङितीरिति(४-४-११६) इरादेशे भ्वादेर्नामिन (२-१-६३) इत्यादिनोपांत्यदीर्घत्वे ना-म्यन्तेत्यादिना ढत्वे अवागीर्ढ्वं १३ मिति सुसंगतान्येवेति ॥ ७ ॥ तथा गमिप्रकृतेरंगीकृतिं विनापि जगामेतिरूपं निरूप्यते । तथाहि । जगिश्छांदसः जगिमाचष्टे णिजि प्रत्यये नामिनोऽकलीतिवृद्धौ अंत्यस्वरादिलोपे जगयतीति क्विपि तल्लोपे णेरन-टीति (४-३-८३) णिज्लोपे जगितिसिद्धं । पुनर्जगिवाचरति कर्तुःक्विपि (३-४-२५) तस्य लोपे क्रियार्थत्वाद्धातुत्वे पंच-म्यामवि कर्त्तरीति (३-४-७१) शवि जगामेति रूपं प्रासिध्यत् ॥ ७ ॥ मारिरेकाम इति रेकृङ् शंकायां माङ्पूर्वकः रेक-मानं प्रयुंक्ते णिगि अद्यतनीमप्रत्यये णिश्रीत्यादिना (३.४-५८) ङे श्चार्द्योंऽशेति (४-१-२) द्वित्वे पूर्वस्य ह्रस्वे णिग्लोपे मव्यस्या (४-२-११३) इत्यकारस्याकारे मारिरेकाम इति सिद्धिमध्यास्ते ॥ ७ ॥ एवं मामिनीमाम इति नवरं अमङ्मङमममी-मृगमंृ गताविति धातुः ॥ ७ ॥ इत्यादिमनोविनोदकाः क्रियाप्रयोगा बहवोऽपि बोध्यवति । तथा मासशब्दात् भ्यामि मास-निशेति (२-१-१००) पक्षेऽकारलोपेऽसिद्धं बहिरंग (४० न्या) इत्यकारस्थानित्वेन सोरु (२-१-७२) रित्यभावे धुट-

स्तृतीय इति दत्वे तु न्यायानित्यत्वे माद्ध्यामिति मन्यते भाष्यकृत्। दुर्गस्तु मास्न्यामिति ॥ ७ ॥ दधिसेगिति। ननु यदि गतिकारकङस्युक्तानां विभक्त्युत्पत्तेः प्रागेव समास इति न्यायात् सेगिति पदेन समासस्तदा वृत्त्यंतोऽसष (१-१-२५) इति सस्य षत्वे विधातव्येपि पदत्वाभावात् पदादित्वाभावात् षत्वं प्राप्नोति! सत्यं, तदापि न भवति विधिव्याख्यानात् यतो नामसिदित्यादिनियमेन (१-१-२१) निवृत्ता पदसंज्ञा, वृत्त्यंतोऽसष इत्यत्र सस्य तु षत्वे पदमेवेतिव्याख्यानात्, विधीयते तर्हि दीर्घवपुष इत्यादौ षत्वं, यतः षत्वे कर्त्तव्ये पदत्वं पदांतत्त्वाच्च षत्वं न स्यात्तन्न, नञा निर्दिष्टस्यानित्यत्वात्। एतदपि कुतो निश्चीयते व्यासौ स्सात् (७-१-१३०) इत्यत्र द्विःसकारपाठात्, सहि नञा निर्दिष्टस्यानित्यत्वात् प्राप्तस्य षत्वस्य निषेधार्थं ॥ छ ॥ एतच्च व्याकरणं क्वचित्प्रचुरतरन्यायविचारैर्दुस्संचरं, इयंच तेषां दिग्। तथाहि नित्यादंतरंगं बलीयः यथा झाया उंदनो झौदनः तमिच्छति (अमव्ययात्क्यन् च ३-४-२३) क्यन् ततः सनि अकृतव्यूहत्वात् झा उंद-नीय स इतिस्थिते द्वित्वं प्राप्नोति औत्वं च, ततो नित्यत्वात् द्वित्वे प्राप्ते तद्बाधित्वाऽन्तरंगत्वादौत्वं भवति जुझौदनीयिषतीति ॥ ७ ॥ तदेवं लक्षणामृतकल्लोलिनीलहरिमालाप्लवनप्रादुर्भवच्छीतीभावः प्रौढपुण्योपचयलभ्य एवेति यतितव्यं तदाप्तये विबुधधुरीणैः ॥ ७ ॥ अतुच्छस्वच्छमते यदि कविकुलच्छंदाभिरुपच्छंदःपरिज्ञाने भवतः कौतुकं, तदा शृणु। समार्द्धसमविषमपादादिप्रकारैः प्रीणितविपश्चिन्मनांसि बहुधा छंदांसि तत्र नानाविधा जातयो बहुप्रकारा दंडकाः। मात्राछंदसि मागध्यां सप्तषष्टिः कोट्यः षष्टिलक्षाधिका भेदाः। उपहासिन्यां चत्वार्यब्जानि षट्पंचाशत्कोट्यः सप्तनवतिर्लक्षाः षष्टिः सहस्राणि। आर्यायां पुनरष्टौ कोटयः एकोनत्रिंशल्लक्षाः विंशतिः सहस्राणि विधानानि। एतज्ञताः प्रस्तारादयः षट् प्रत्ययाः

Indira Gandhi National Centre for the Arts

इत्यादि छंदोऽनुशासनं निस्तुषप्रतिभाप्राग्भारभ्राजिष्णूनामेव सम्यगवगतं ॥ ८ ॥ अथ कदाचित्साहित्यसुधारसास्वादे किंचित्सतृष्णं मनस्तदा सकर्णः समाकर्ण्य लेशतः तद्गतं स्वरूपं शब्दार्थवैचित्र्यबंधुरं कविकर्म्म साहित्यसारं ब्रुवते विद्वांसः तत्र शब्दो वाचक औपचारिको व्यंजकश्चेति त्रेधा, मुख्योपचरितव्यंग्यभेदेनार्थस्यापि त्रैविध्यं । शब्दस्य वैचित्र्यं दोषहानेन गुणाधानेन भूषणन्यासेन च बोभवीति । दुष्टासंस्कारासमर्थानर्थकपदवाक्यलुप्तध्वस्त विसर्गातिष्टसंबंधवंचितसमाप्तपुनरारब्धभग्नप्रक्रमक्रमादयो दोषाः । माधुर्यौजःप्रसादाख्या गुणाः । अनुप्रासादीनि भूषणानि । अर्थस्य वैचित्र्यं वस्त्वलंकाररसभेदात्रेधा । इत्यादिशब्दार्थविचाररत्नसंभारभासुरे साहित्यसागरे कोविदानामेव प्रसरीसरीति बुद्धिबेडा । तथा
॥ अत्कः शत्कयुतोऽक्षणकर्म्मकचपः कूचीवराटः क्षुणो निस्त्राकोजनिमांगगः सहतके होलश्च होलव्रजं । सैवाङ्गैयकप्रतिष्कशोगतसमाप्तालः समाकंचनो विष्यत्वं भवते क्रमादवकुटा राज्ञा ह्यऽद्दष्टोषपात् ॥ १ राजोत्पले हरिभुजामिह केशवस्य यस्योरसींदुरदनं च जटाकलापे । शंखांबरोपि पवनादरिनाथसूनुः कांतासवो गतनया विपुलं ददातु ॥ २ ॥ पायाद्वः करणो रणोरणरणोराणोरणो वारणा दत्ता येन रमारमारमरमारामारमाः सारमाः । विष्णुर्जिष्णुरभीरभीरभरभीराभीरभी सारभी स श्रीमानुदयोदयोदयदयो दायोदयोवेदयोः ॥ ३ ॥ इत्यादिविषम २ तरवृत्तसमस्याचित्रक्रियागुप्तकादीन्यनेकविद्वन्मनोविनोदकलितकौशलान्यनेकशो भवेयुरिति कियदुच्यते समधिकं, कौतुकमात्रप्रवृत्तेरिति ।

प्रामाणिकचूडामणे अथ षट्दर्शनीकर्कशतर्कशर्करास्वादरसिकचित्तवृत्तिता चेत् तदा शुभोदर्कः खट्त्रयं तर्काभिलाषसंपर्कः इत्याकर्ण्यतां क्षणं तद्वितर्कोपि । इह मूलभेदापेक्षया षडेव तार्किकाः । बौद्धा नैयायिकाः सांख्या जैना वैशेषिका

जैमनीयाश्चेति । एतेषां च स्वरूपं निरुपमानपरिज्ञानप्रधानैरपि सूरिवरैर्ग्रंथगौरवैरपि न शाशक्यते न्यक्षेण वक्तुं । अनेके चैतेषां तत्तत्तर्कग्रंथसंदर्भेषु स्वस्वव्यक्तवक्तव्यताप्रकारविस्तारा भवंतस्तु स्वयमेव तान्मतपूर्विण एवेति किमुच्यते ऽधिकं । परमेतेषु श्रीमज्जिनपतिमतमेव विततमवितथतया मतिमतामभिमतं । यत्र रागद्वेषाद्यशेषदोषप्लोषी जिन एव देवः । तथा अजिह्मब्रह्मचर्यादिगुणपरिकरितमूर्त्तयः सुसाधव एव गुरवः । तथा निसर्गतोऽपवर्गसंसर्गहेतुर्दयामूलो धर्म्मः । तथोत्पादव्ययध्रौव्यात्मकं वस्तु तत्त्वमिति । एवमेव चैतच्चतुष्टयं युक्तियुक्तमुत्पश्यामः । तत्र तावद्देवो जिन एव विचारचारुचेतसि चकास्ति नापरः । एतद्धि देवलक्षणं, यदपारसंसारकांतारोदरप्रसारिसंसारिसारंगसंघरंगभावप्राणप्रहाणकारिप्रकृष्टकूटकपटकोटिघटनापटीयोमृगयूपमानाशेषरागादिदोषाऽदूषितत्वं । तथा निखिललोकालोकाकलनकुशलामलकेवलालोकसंपदालिंगितत्वं । तथा अनादिभवोपचितप्राणिपरंपरानेकतत्तद्भवभ्रमप्रमुखाशेषदुःखोत्करांकुरपूरप्ररोहाप्रतिहततया (हननयो) दुर्वारकर्मपटलीपटलविकलत्वं, विगताशेषजन्मजरामरणादिक्लेशविह्वलत्वं । तथा निरवधिनिरपायाजिह्मब्रह्मदर्शनानंदवीर्यात्मकत्वं । तथा अखिलत्रिभुवनवलयस्यापि अहमहमिकामहत्त्वमित्यादि । इत्यादिलक्षणलक्षित एव च श्रीमान् जिनः प्रख्यायते संख्यावद्भिः । तथा सर्वप्राणिप्रकरप्रकृष्टप्रमोदप्रदाने प्रवणा श्रीमद्भगवन्मूर्तिरपि चात्र साक्षिणी । तथाहि-अनुमेमीयंते हि मनीषिणा निरंकमृगांकमंरूलोज्ज्वलविपुलकपोलस्थलप्रसर्प्पद्रश्मिविस्मेरिताखिलमनीषिजनमुखारविंदप्रकृष्टप्रशमामृतरसस्पंदिवदनेंदुसंदर्शनेन । तथाऽनवमप्रशमसुधारसपूरपूरितोत्फुल्लकमलदलमंजुलोन्मीलदचटुललोचनयुगलनिभालनेन च क्रोधादिविकारप्रकारधिकारं । तथा बोबुद्ध्यंते प्रबुद्धाः कामिनीकमनीयांगपरिष्वंगप्रसंगविवर्जितोत्संगसमीक्षणेन स्मरतिरस्कारं ।

SANS
294.582
SUR-

Indira Gandhi National Centre for the Arts

यूति प्रस्फुरद्बहुलभक्तिप्राग्भारप्रोल्लासितोच्छलल्लोलकल्लोलोल्लासिमानसांभोधयस्तत्तादृग्दिव्यर्द्धिसंपन्ना अपि षट्पंचाश-
द्दिक्कुमार्यो जिनजन्ममंदिरोदरे, विनयावनतशिरसश्च संस्तुत्यार्हंतं तन्मातरं च, विदेधीयंते विधिवत् कृतकृत्यमात्मानं
मन्यमाना आयोजनं क्षितितलसंमार्जनगंधोदकप्रवर्षणपुष्पप्रकरप्रवर्षणादिकृत्यैरनुपमानं भगवज्जन्ममहिमानं । तथा सुरें
द्राणामप्यासनानि त्रिभुवनप्रौढप्ररिवृढप्राप्तिप्रभवत्प्रसर्प्पत्प्रहर्षप्रकर्षान्नरीनृततीव तत्कालमेव कलयंति चलत्वं । झटिति
प्रकटितोत्कटक्रोधसंघट्टोल्लसद्भ्रूकुटितटस्फुटितललाटपट्टप्रकटनपूर्वकंप्रयुक्तावधिज्ञानज्ञातत्रिजगत्पतिजन्मानो भगवन्नमस्कृ
तिस्तुतिविरचनपराश्चतुःषष्टिरपि प्रयतंते सुरेंद्रा अर्हज्जनिमहिमप्रथनाय । अथच भक्तिप्राग्भारभासुरांतःकरणा मिलि
त्वा समग्रा अपि सुरविसराधिराजा अमरगिरिगिरीयःश्रृंगाग्रासंगिसौवर्णसिंहासनाध्यासिनो वितन्वते भगवतः क्षीरपारा-
वारोदरस्फुरन्नीरपूरपूरितकुंभसंभारैर्जन्माभिषेकमहोत्सवं । तत्रच महाप्रयत्नप्रताडितोद्दंडदुंदुभिप्रचंडढक्काबक्कत्रंबकहुडक्कादि-
दिव्यभव्यातोद्यचक्रोद्भवन्मिलत्सकलदिक्चक्रवालोच्छलद्बहुलप्रतिरवोत्तालविपुलनभोमंडलाविलंबिप्रबलतरोल्वणाबलकोलाह-
लोत्रस्यत्तरलतरतारचतुर्जलधिजठरांतरस्फुरत्तिमितिमिंगिलाद्यतुच्छमत्स्यपुच्छोच्छालिताखिलजलभरोत्संगरंगत्तुंगतरतरंगभंगप-
रंपरोत्पतत्सीकरप्रकरैर्धाव्यते ब्रह्मांडभांडमपि । तथा सरभसरसवशनृत्यदमरसुंदरीसुंदरोरसः स्थलीप्रस्फुरत्त्रुट्यत्तारतरहार-
संभारदिगुदरविकीर्यमाणविभक्तमुक्ताप्रकरैस्तारकितमिवाभाति भूवलयमपि इत्यादिभगवज्जनिमहव्यतिकरसमुपजातात
निममहिमवंहिमोद्भावने न प्रभविष्णुर्विष्णुरपि। अथ चानवरतसुरविसरपरिकरितमूर्त्तिरधिगततदवसरो जलधरधाराधोरणी
वानपेक्षितविषमोन्नतादिविभागः सुरतरुरिव त्रिजगज्जनसमीहितार्थसार्थप्रथनप्रत्यलो वरिवृष्यावर्षं सुवर्णमणिदुकूलाभर

Indira Gandhi National Centre for the Arts

॥ १ ॥ ब्रह्मा चर्माक्षसूत्री सुरयुवतिरसावेशविभ्रांतचेताः शंभुः खट्वांगधारी गिरिपतितनयापांगलीलानुबद्धः । विष्णुश्चक्राधिपः सन् दुहितरमगमद्गोपनाथस्य मोहादर्हन् विध्वस्तरागो जितमरणभयः कोऽयमेष्वाप्तनाथः ।२। इत्यादि ॥ एनमपि च भगवंतमर्हंतं केचित् महामोहोपहतमतयोऽनधिगतैतत्त्रिभुवनानुपममहिमप्राग्भारा मानुषत्वमात्रेणासर्ववेत्तृत्वमुद्भावयंतोऽनाप्ततया प्रतिपनीपेदिवांसः । तथाहि । ते ह्येवमनुमानयंति । ऋषभवर्द्धमानादिर्जिनो न सकलार्थसाक्षात्करणकुशलज्ञानशाली । मनुष्यमात्रत्वादस्मदादिवत् । नचासर्वज्ञोप्याप्ततया स्वीकर्तुमुचितः, सर्वेषामपि तत्प्रसंगात् । तदेते मंदबुद्धयो यत्तदसंबद्धप्रलापिनः कस्य स्युर्न हास्यास्पदं । अन्वयव्यतिरेकासिद्धेर्हेतोर्युगपदसिद्धताद्यशेषदोषदूषितत्वात् । अंधाः सर्वेपि पुरुषा, मनुष्यत्वात्, प्रसिद्धपुरुषविशेषवदित्याद्यनुमानवत्पक्षस्य प्रत्यक्षादिभिर्बाध्यमानत्वात् । एतदुक्तोत्तरेणापि विदुषां लज्जैवेत्यवगणयितव्याः । तथा त्रैलोक्याद्भुताचिंत्यमहिमवत्त्वेन भगवतो मानुषमात्रताया असिद्धेः । तस्य च महिमांभोधेरयं बिंदुरेको व्यावर्ण्यमानः समाकर्ण्यतां समुत्कर्णैः सकर्णाः । तथाहि ॥ अनंतमहिमवैभववतो भगवतो ज्ञानत्रयावभासिनः स्वर्गावासप्रवासिनो गर्भावतरणसमय एव तावत्समुपलभते चतुर्दशभुवनाधिपत्यं सूचयंतीव चतुर्दशोदारस्वप्नानि जननी । समुपजाते च भगवज्जन्मनि, प्रसाद्यंते सर्वतस्तत्क्षणादेवोद्योतभरसखानि दिग्मुखानि, नारका अपि च भगवतो लोकोत्तरानंतमाहात्म्यभृशिमवशादंतर्मुहूर्त्तकालं कलयेयुरतुलसुखानि । वसुंधरापि च त्रिभुवनजनतोत्कृष्टपुण्यप्रचयोपचितोत्तमपुरुषजन्मप्रहर्षिणी समुल्लसिति चतुरंगुलीं । अथच सर्वथा अचिंत्यत्वेन भगवन्महिम्नो झगिति पीठप्रकंपप्रेरिताप्रतिहतप्राज्यावधिज्ञानात्रबुद्धजिनजन्मानः सरभसमेव समि-

कुज्ञानकुश्रुतिकुदृष्टिकुमार्गदोषान् सम्यग् विचारयतु कोऽत्र परापवादः ॥ १ ॥ यथाच विचारितं भगवद्भिः पूर्वसूरिभिः सम्यग्नयमार्गानुगामिभिः ॥ तथाहि । विष्णुः समुद्यतगदायुधरौद्रपाणिः शंभुर्ल्लसन्नरशिरोस्थिकपालमाली । अत्यंतशांतचरितातिशयस्तु वीरः कं पूजयाम उपशांतमशांतरूपं ॥ १ ॥ दुर्योधनादिकुलनाशकरो बभूव विष्णुर्हरस्त्रिपुरनाशकरः किलासीत् । क्रौंचंगुहोऽपि दृढशक्तिहरं चकार वीरस्तु केवलजगद्धितसर्वकारी ।२। पीड्यो ममैष तु ममैष तु रक्षणीयो वध्यो ममैष तु नचोत्तमनीतिरेषा । निःश्रेयसान्युदयसौख्यहितार्थबुद्धेर्वीरस्य संति रिपवो नच वंचनीयाः ॥ ३ ॥ रागादिदोषजनकानि वचांसि विष्णोरुन्मत्तचेष्टितकराणि च यानि शंभोः । निःशेषदोषशमनानि मुनेस्तु सम्यक् वंद्यत्वमर्हति नु को नु विचारयध्वं ॥ ४ ॥ यश्चोद्यतः परवधाय घृणां विधाय (विहाय) त्राणाय यश्च जगतः शरणं प्रवृत्तः । रागी च यो भवति यश्च विमुक्तरागः पूज्यस्तयोः क इह ब्रूत चिरं विचिंत्य ।५। रुद्रो रागवशात् स्त्रियं वहति यो हिंस्रो ह्रियावर्जितो विष्णुः क्रूरतरः कृतघ्नचरितः स्कंदः स्वयं ज्ञातिहा । क्रूरार्या महिषांतकृन्नरवसामांसास्थिकामातुरः पानेभुश्च विनायको जिनवरे स्वल्पोऽपि दोषोस्ति कः ॥ ६ ॥ बंधुर्न नः स भगवानरयोपि चान्ये साक्षान्न दृष्टतर एकतमोऽपि चैषां । श्रुत्वा वचः सुचरितं च पृथग्विशेषं वीरं गुणातिशयलोलतयाश्रिताः स्मः ।७। यस्य निखिलाश्च दोषा न संति सर्वे गुणाश्च विद्यंते । ब्रह्मा वा विष्णुर्वा हरो जिनो वा नमस्तस्मै ॥ ८ ॥ इतिलोकतत्त्वनिर्णये श्रीहरिभद्रसूरिपादानां वचांसि । तथान्येप्यूचिवांसः । ईशः किं भिन्नलिंगो यदि विगतभयः शूलपाणिः कथं स्यान्नाथः किं भिक्षचारी यतिरितिच कथं सांगनः सात्मजश्च । आर्याजः किन्त्वजन्मा सकलविदिति किं वेत्ति नात्मांतरायं संक्षेपात्सम्यगुक्तं पशुपतिमपशुः कोऽत्र धीमानुपास्ते

जाज्ञायंते विज्ञाः समस्तशस्त्रादिविकलकोमलसरलभुजयुगलविलोकनेन द्विषद्द्वेषदोषलोपं । निश्चेचीयंते च विपश्चितः समस्तप्रशस्ताप्रशस्तक्रियाकरणपरिहरणचणत्वेन कृतकृत्यादित्वात् (त्वम्)। तथा च प्रोचिवांसः स्तुतिकृद्विद्वांसः। प्रशमरसनिमग्नं दृष्टियुग्मं प्रसन्नं वदनकमलमंकः कामिनीसंगशून्यः। करयुगमपि यत्ते शस्त्रसंबंधवंध्यं तदसि जगति देवो वीतराग त्वमेव ॥ १ ॥ नचैवं हरिहरविरंचिप्रभृतीनामपि मूर्तिषु तच्चिह्नादर्शनात् रागादिरहिततेति चिंत्यं, यतो निर्णीयत एव नयज्ञैः केषुचिद्देवेषु प्रसरद्रोषसमुन्मेषोद्भ्रमद्भ्रुकुटितटस्थपुटितोत्कटललाटपट्टावलीटीकनेन प्रकटमेव विकटक्रोधोद्यत्कृपीटयोनिप्लुष्टविशिष्टयशःशरीरत्वं । सुबोध एव च केषुचिद्विलसद्रमणीरमणीयांगरमणरसिकतावलोकनेन विस्फारस्मरापस्मारघस्मरः। तथा सुज्ञान एव पुण्यपरिज्ञानैः करालकरवालप्रचंडकुंडलितकोदंडकांडोल्लसद्भल्लमुद्गरशूलशक्तिप्रमुखाप्रशस्तशस्त्रनिचयांचितकरनिकरावधारणेन विद्वेषोन्मेषः, लक्ष्यते दक्षैः करतलकलितामलजपमालिकासंकलनेन व्यामोहसमूहो विद्यमानः तदुत्तरतरपरमध्येयरूपदेवांतरविशेषश्च । तथाध्यवसीयत एव सद्भिः पाणितलावलंबिविमलजलकुंडिकाकल्पनेनाशौचशौचनीयत्वादिभिः सर्वसंसारिप्राणिगणेभ्यो निर्विशेष इति । तथाचोक्तं स्त्रीसंगेत्यादि । तत्कथयत भोः कथमेते तथा २ रागादिदोषमथिता अपि देवत्वमर्हंति । एवमपि तद्देवत्वकल्पने विलुप्ता सा समग्राप्याराध्याराधकव्यवस्था । सर्वसंसारिणां रागादिमत्त्वाविशेषात् देवत्वोपपत्तेराराध्यत्वप्रसंगात् । अहो मोहनटनाटनप्रकारः । यतः “ सरागोपि हि देवश्चेत् गुरुरब्रह्मचार्यपि । कृपाहीनोऽपि धर्म्मः स्यात्कष्टं नष्टं हहा जगत् १ ” ततो युज्यते खलु सारेतरवस्तुव्यतिकरविचारणचणचित्तवृत्तीनां देवतत्त्वे सम्यग्विचारो यतः उक्तं नयज्ञैः । नेत्रैर्निरीक्ष्य विषकंटकसर्प्पकीटान् सम्यक्पथा व्रजति तान् परिहृत्य सर्वान्।

Indira Gandhi National Centre for the Arts

णगजरथाश्वपरिकरपुरजनपदादिभिरपि, तदनु परिहरन् समग्रसंगानुषंगमभ्यालिंगेत भगवंतं सकललोकालोकाकलनकुशलाम-
लकेवलालोकसंपत् । अथ चाहमहमिकावनम्रकम्रमूर्धानस्त्रिभुवनविभुभक्तिप्रकटनोत्कंठुलमानसा विरचयंति चराचरोदा-
राधारसारैरिव सुरासुरविसरा भगवत्समवसरणं, यत्र शक्यते गुरुतरप्रतिभाभाजिष्णुना सुरगुरुणापि व्यावर्णयितुं । यत्र
जगत्रयीत्राणायेव सज्जितस्वर्णरजतमणिमयी वप्रत्रयी । दंध्वनीत्ययमेव त्रिभुवनत्राणचंचुश्चातुर्गतिकभवोद्भवभयभरापहारी
भगवान् शरणमाश्रीयतामिति वदन्निव चतुर्दिगागतजनेभ्यो जलधरध्वानधिक्कारकारबंधुरोद्धुरध्वनिमादधद्दुंदुभिः । नर्नर्त्ति
प्रबलमहाबलाबलांदोलितस्त्रिभुवनदमनोद्दामपटिमैकधामाद्भममोहद्विषः प्रोज्जासनोपार्जितोद्यज्जयपताकेव वास्तोष्पतिस-
मुत्तंभितो जंभजित्केतुः । इतस्ततः स्वामिपादारविंदवंदनोद्भूतप्रभूतप्रमोदातिरेकात् विमोमुच्यंते नाकिनिकायाः सिंहना-
दान् । मधुरतरारावचालितांबरोदरांतरालं जेगीयंते भगवद्गुणनिकरान् किंनराः । नृत्यंति चाप्रमाणप्रमोदभरभासुराः
केचित्सुरविसराः । तत्रच भगवाननवरतं पुरः २ संचार्यमाणस्फुरत्किरणनिकरकर्बुरितांबरोदरोदारचामीकरोज्ज्वलकमलमंजु-
लदलेषु पदयुगलविन्यासं विदधत्सर्वतोऽचिंत्यमाहात्म्यवशतः संनमत्सु तरुगणेष्वपि प्रविश्य प्राग्दिशा विलसदशोकतरुतले
त्रिदशपरिवृढोपढौकितप्रौढचामीकरोद्भासिसिंहासनेऽध्यास्ते । शिरसि दरिधरीति चापहृतसकलसितकरमंडलस्फुरद्धवलि-
मोद्भवदर्प्पसंचयं भगवतस्त्रिभुवनपतित्वावबोधकं त्रिदशगणपतिर्विपुलमातपत्रत्रितयं । चालयंति चोभयतोऽपि सुपर्वप-
तयो जाह्नवीजलसमुच्छलद्विमलकल्लोलोल्लासिभाभरभ्राजितोदारचामरश्रेणीं । इत्याद्यनंतातिशयधाम्नो भगवतो महिम्नः
प्रथने सुरगुरुरप्यप्रभुरेवेति किमुच्यतेऽस्मादृशैरिति । एवंच विरचय्य चिरं त्रिजगद्धितोपदेशोपकारं बभूवानंतचतुष्टयीस्व-

Indira Gandhi National Centre for the Arts

ज्ञायंते विज्ञाः समस्तशस्त्रादिविकलकोमलसरलभुजयुगलविलोकनेन द्विषद्द्वेषदोषप्लोषं । निश्चेचीयंते च विपश्चितः समस्तप्रशस्ताप्रशस्तक्रियाकरणपरिहरणचणत्वेन कृतकृत्यादित्वात् (त्वम्)। तथा च प्रोचिवांसः स्तुतिकृद्विद्वांसः। प्रशमरसनिमग्नं दृष्टियुग्मं प्रसन्नं वदनकमलमंकः कामिनीसंगशून्यः। करयुगमपि यत्ते शस्त्रसंबंधवंध्यं तदसि जगति देवो वीतराग त्वमेव ॥ १ ॥ नचैवं हरिहरविरिंचिप्रभृतीनामपि मूर्तिषु तच्चिह्नादर्शनात् रागादिरहिततेति चिंत्यं, यतो निर्णीयत एव नयज्ञैः केषुचिद्देवेषु प्रसरद्रोषसमुन्मेषोद्भ्रमद्भ्रुकुटितटस्थपुटितोत्कटललाटपट्टावलीटीकनेन प्रकटमेव विकटक्रोधोद्यत्कृपीटयोनिपुष्टविशिष्टयशःशरीरत्वं । सुबोध एव च केषुचिद्विलसद्रमणीरमणीयांगरमणरसिकतावलोकनेन विस्फारस्मरापस्मारघस्मरः। तथा सुज्ञान एव पुण्यपरिज्ञानैः करालकरवालप्रचंडकुंडलितकोदंडकांडोल्लसद्भल्लमुद्गरशूलशक्तिप्रमुखाप्रशस्तशस्त्रनिचयांचितकरनिकरावधारणेन विद्वेषोन्मेषः, लक्ष्यते दक्षैः करतलकलितामलजपमालिकासंकलनेन व्यामोहसमूहो विद्यमानः तदुत्तरतरपरमध्येयरूपदेवांतरविशेषश्च । तथाध्यवसीयत एव सद्भिः पाणितलावलंबिविमलजलकुंडिकाकल्पनेनाशौचशौचनीयत्वादिभिः सर्वसंसारिप्राणिगणेभ्यो निर्विशेष इति । तथाचोक्तं स्त्रीसंगेत्यादि । तत्कथ्यत भोः कथमेते तथा २ रागादिदोषमथिता अपि देवत्वमर्हंति । एवमपि तद्देवत्वकल्पने विलुप्ता सा समग्राप्याराध्याराधकव्यवस्था । सर्वसंसारिणां रागादिमत्त्वाविशेषात् देवत्वोपपत्तेराराध्यत्वप्रसंगात् । अहो मोहनटनाटनप्रकारः । यतः " सरागोपि हि देवश्चेत् गुरुरब्रह्मचार्यपि । कृपाहीनोऽपि धर्म्मः स्यात्कष्टं नष्टं हहा जगत् १ " ततो युज्यते खलु सारेतरवस्तुव्यतिकरविचारणचणचित्तवृत्तीनां देवतत्त्वे सम्यग्विचारो यतः उक्तं नयज्ञैः । नेत्रैर्निरीक्ष्य विषकंटकसर्प्पकीटान् सम्यक्पथा व्रजति तान् परिहृत्य सर्वान् ।

Indira Gandhi National Centre for the Arts

णगजरथाश्वपरिकरपुरजनपदादिन्निरपि, तदनु परिहरन् समग्रसंगानुषंगमप्यालिंगेत न्नगवंतं सकललोकालोकाकलनकुशलाम-
लकेवलालोकसंपत् । अथ चाहमहमिकावनम्रकम्रमूर्द्धानस्त्रिज्जुवनविज्जुन्नक्तिप्रकटनोत्कंठुलमानसा विरचयंति चराचरोदा-
राधारसारैरिव सुरासुरविसरा न्नगवत्समवसरणं, यन्न शक्यते गुरुतरप्रतिन्नान्नाजिष्णुना सुरगुरुणापि व्यावर्णयितुं । यत्र
जगत्रयीत्राणायेव सज्जितस्वर्णरजतमणिमयी वप्रत्रयी । दंध्वनीत्ययमेव त्रिज्जुवनत्राणचंचुश्चातुर्गतिकन्नवोद्भवन्नयन्नरापहारी
न्नगवान् शरणमाश्रीयतामिति वदन्निव चतुर्दिगागतजनेन्यो जलधरध्वानधिक्कारकारबंधुरोद्धुरध्वनिमादधद्दुंदुन्निः । नर्नर्त्ति
प्रबलमहाबलाबलांदोलितस्त्रिज्जुवनदमनोद्दामपटिमैकधामाद्दाममोहद्विषः प्रोज्जासनोपार्जितोद्यज्जयपताकेव वास्तोष्पतिस-
मुत्तंन्नितो जंन्नजित्केतुः । इतस्ततः स्वामिपादारविंदवंदनोद्भूतप्रन्नूतप्रमोदातिरेकात् विमोमुच्यंते नाकिनिकायाः सिंहना-
दान् । मधुरतराराववाचालितांबरोदरांतरालं जेगीयंते न्नगवद्गुणनिकरान् किंनराः । नृत्यंति चाप्रमाणप्रमोदन्नरन्नासुराः
केचित्सुरविसराः । तत्रच न्नगवाननवरतं पुरः २ संचार्यमाणस्फुरत्किरणनिकरकर्बुरितांबरोदरोदारचामीकरोज्ज्वलकमलमंजु-
लदलेषु पदयुगलविन्यासं विदधत्सर्वतोऽचिंत्यमाहात्म्यवशतः संनमत्सु तरुगणेष्वपि प्रविश्य प्राग्दिशा विलसदशोकतरुतले
त्रिदशपरिवृढोपढौकितप्रौढचामीकरोन्नासिसिंहासनेऽध्यास्ते । शिरसि दरिधरीति चापहृतसकलसितकरमंडलस्फुरद्धवलि-
मोन्नवदर्प्पसंचयं न्नगवतस्त्रिज्जुवनपतित्वावबोधकं त्रिदशगणपतिर्विपुलमातपत्रत्रितयं । चालयंति चोन्नयतोऽपि सुपर्वप-
तयो जाह्नवीजलसमुच्छलद्विमलकल्लोलोल्लासिन्नान्नरन्नाजितोदारचामरश्रेणीं । इत्याद्यनंतातिशयधाम्नो न्नगवतो महिम्नः
प्रथने सुरगुरुरप्यप्रन्नुरेवेति किमुच्यतेऽस्माद्दृशैरिति । एवंच विरचय्य चिरं त्रिजगद्धितोपदेशोपकारं बन्नूवानंतचतुष्टयीस्व-

Indira Gandhi National Centre for the Arts

रूपो विमुक्तदेहस्थितिः, सर्वजन्मजरामरणादिक्लेशविरहितः, प्राग्प्रदर्शितस्वरूपः, सिद्धावस्थासंसर्गभागपि । तस्मान्मात्सर्योत्सारणेन सुनिश्चितपारमार्थिकदेवांतराभावेऽत्र त्रिभुवने श्रीमान् जिन एव सेव्योऽपवर्गाभिलाषिभिरिति ।

तथा गुरवोऽपि सम्यग् ब्रह्मचर्याद्यजिह्मगुणपवित्रपात्रीभूतगात्रा एव हि सम्यक्परिज्ञातश्रेयोमार्गाराधनसावधानाः परस्यापि तत्प्रबोधने प्रवर्त्तने च प्रत्यला यथावदासेव्याः स्वहितमिच्छुभिः । यतो नहि स्वयमविज्ञातश्रेयोमार्गा अप्रवर्त्तमानाश्च तत्र परेषां तत्प्रबोधप्रवृत्तिप्रदाने प्रत्यलतामाकलयंति । स्वस्मिन्नसतः परेषां प्रदातुमशक्यत्वात् । स्वयं दरिद्रो न परमीश्वरीकर्तुमीश्वरः इति न्यायात् । तन्मार्गश्च सर्वविरतिदेशविरतिभेदेन द्विविधः श्रीमद्धर्म्मनिधिः । तत्र सर्वोत्तमगरिमगुणवत्त्वाद्गुरुत्वलक्षणस्य सर्वविरता एव गुरवो गुरुगौरवार्हाः । ते च पंचमहाव्रतधुराधरणधौरेया एव भवेयुस्तेचैवं ज्ञेयाः । ये हि सूक्ष्मेतरादिभेदाशेषसत्त्वसंघातोपघातरक्षैकनिष्ठा एव यतंते सर्वथा मनोवाक्काययोगैः । प्राणांतेऽपि च विश्वविश्वविश्वाविश्वासाद्यशेषदोषद्विरेफनालीकं नालीकं वावचति वचनं। कल्पांतेपि च ये भैक्ष्यमात्रोपजीविनः सर्वप्राणिपीडापवर्जिनस्तत्तद्विततदुर्गतिगतदुःखसंगतिनिदानं नैव शेश्रीयंते ह्यदत्तादानं । नैव रंरस्यंते मनसापि तत्तद्भवभ्रमाद्यशर्मरमाकार्मणे सर्वधर्म्मकर्म्मनिर्मथने रमणीरमणीयांगरमणे । सर्वभयनिधाने संसारानुसंधानलोभप्रधाने सद्बुद्धितिरोधाने निःशेषदोषपोषाधाने तत्तद्दुर्ध्यानविधाने सदा शोकोद्रेकमादधाने सर्वाशर्महर्म्याधर्म्मकर्मोपचयं विदधत्येवपरिग्रहसन्निधाने (न)मनःप्रणिधानं । एवं च पंचमहाव्रतीधुराधरणधुरंधरा निषेधयंत्येव रजनीभोजनभजनादिसमस्ताश्रवसंतानं । दंदह्यतेऽनवरतं दुस्तपतपःसमुद्दीप्तज्वलनज्वालाभिर्निजदुष्कर्ममर्मतृणसंदोहान् । निरोधयंति च ये साधुयोधाः समितिनिपुणतयामनोवा-

॥१३॥

Indira Gandhi National Centre for the Arts

कायकषायाश्रवविरोधिनः । नाश्लिष्यंति च सदा गुप्तित्रितयावासनिवासिनः क्षितितलसमुच्छलद्बहुलकर्मकश्मलधूलीं । ततश्चैवं सम्यगवगतस्वरूपशिवपथपथिकाः सुसाधव एवाभ्युपेया गुरवो नापरे । सावद्यकर्म्मभ्यो विरतिविरहितानामपि गुरुत्वे पशूनामपि गुरुत्वप्रसक्तेर्विशेषाभावात् । किंच यतो यथावत् तत्त्वातत्त्वप्रबोधप्रदानेन परेषां भवावटप्रपातरक्षणादेव गुरवो गुरुगौरवमर्हंति । ततश्च तत्तत्प्राणिप्रहाणादिकुधर्मोपदेशानुमेयाज्ञानगदांधितलोचनाः कथं परेषां तत्त्वमार्गोपदर्शनेन दुर्गतिगर्त्तावर्त्तप्रपातरक्षिणः । नह्यंधा अंधैर्निरुध्यंते विधिवदधमाध्वप्रवर्त्तनात् । तथा कथं गुरुतरपरिग्रहाद्युपलशिलाभारभारितांगाः स्वयं संसारसागरक्रोडे ब्रुडंतः परेषां तदुत्तारणाय प्रगल्भायंत इति विमर्श्यतां क्षणं गुरुतत्त्वमपि ॥ ॥ तथा श्रीमान् धर्मोपि श्रीमज्जिनवरोपदिष्ट एव प्रतिभाति प्रेक्षाचक्षुषामदूष्यतया । यत्र हि व्यावर्ण्यते, सकलजीवनिकायाभयदानमेव प्रधानं सर्वसत्त्वैकहिताधानं । विरतिरेव प्रशस्यते सर्वदुःखसंयोजनेभ्यः सदा मिथ्यावचनादत्तादानाब्रह्मपरिग्रहरजनिभोजनेभ्यः । धिक्क्रियंते च यत्र प्रयत्नतः क्रोधमानमायालोभकषायाः । अधिक्रियंते च विनयार्जवमार्दवक्षांतिप्रभृतयो गुणाः । आदेडीयंते सकलदुष्कर्म्ममर्म्मच्छिदुरं परमपदसौधाधिरोहसोपानवीथीप्रायं बहुधा तपः । इत्यादि कः शक्नोत्यस्य श्रीमद्धर्म्मनरेंद्रस्य बंहीयोवैभवप्रथिमानं प्रथयितुं । साक्षात्कल्पतरुरेवायं त्रिजगज्जनमनःकल्पितानल्पसंपत्संप्रवितरणायाव्य लवेतालज्वलनज्वालाकरालरिपुकरवालप्रबलमृगराजोत्फणफणिपतिप्रभृतिभ्योपि परित्रायत एवासौ निजभाक्तिकजननिकरं । रक्षत्येवायं सम्यगाराधितो दुस्तरतरजलधिजलपूरापारकांतारोदरेऽपि प्रसरतस्तनुमतः । किमुच्यतेऽधिकं । शिवपदसुखास्वादफलस्यापि प्रवितरणे पटीयानेवायं । नचैवं परतीर्थिकसार्थसमर्थिता अपि तत्प्रापणप्रवणतया च-

Indira Gandhi National Centre for the Arts

कासंति चतुरचेतस्सु । तत्र षट्जीवतत्त्वावबोधतद्रक्षोपायानपायप्रयत्नाभावात् १। तथा असकलकलयितृपुरुषविशेषप्रणीतत्त्वात् २। निबिडरागद्वेषकामक्रोधलोभाद्यभिभूतैरजितेंद्रियपुरुषविशेषैः परिगृहीतत्वाच्चेतिहेतुत्रयी। नचैषा असिद्धतादिदूषणकणेनापि परीकरितस्वरूपा । यतो न तावल्लौकिकधर्मेषु प्रथमतः षट्जीवपरिज्ञानपूर्वकस्तद्रक्षाप्रयत्नः । तदुपघाताविनाभाविस्नानादिक्रियास्वपि धर्मबुद्ध्या प्रवृत्त्युपलब्धेः । नच तासामपि धर्म्महेतुतेतिचिंत्यं विचारचारिमावदातहृदयैः, जलशैवलाद्येकेंद्रियजंतूनां तदाश्रितत्रसजंतूनां च प्राणापहारकारित्वात् । यदुक्तं उत्तरमीमांसायां "लूतास्यतंतुगलिते ये बिंदौ संति जंतवः । सूक्ष्मा भ्रमरमानास्ते नैव मांति त्रिविष्टपे" ॥ तथा स्कंदपुराणगतनरपुराणे । कुसुंभकुंकुमांभोवन्निचितं सूक्ष्मजंतुभिः । न दृढेनापि वस्त्रेण शक्यं शोधयितुं जलं ।१। सूक्ष्माणि जंतूनि जलाश्रयाणि जलस्य वर्णाकृतिसंश्रितानि । तस्माज्जलं जीवदयानिमित्तं निर्ग्रंथशूराः परिवर्जयंति ।२।" इत्यादि। नच हिंसाक्रियाया अपि धर्म्महेतुता, निरंतरं तन्मात्रोपजीविनां शौनिकधीवरादीनामपि परमतमधार्म्मिकत्वेन विप्रादिभिरपि पूज्यत्वोपपत्तेः । नच तेषामाजीविकाधिया तत्र प्रवृत्तेर्दुर्गतिदौर्गत्याधिगतिनिदानाय सा, परेषां तु परलोकैकहितधर्मार्थितया तत्र प्रवृत्तेर्न्नविष्यति तद्धेतुरितिवाच्यं । परबुद्धिभेदमात्रेण भावानां स्वभावनाशाभावप्रसंगात् । प्राणापहारस्वभावे विषभक्षणे जीवितमरणाशंसिनोर्द्वयोरपि प्रवृत्तौ तुल्यस्यैव फलस्योपदर्शनात् । अथ मन्येथाः । न स्नानादौ प्राणिप्राणोपरमेणाधर्मागता, जलादीनां प्राणित्वेनाऽप्रसिद्धेः । तदाश्रितानां च कतिपयत्रसजंतूनां वधसंभवेपि तत्क्रियोपार्जितोर्जस्विपुण्यप्राग्भारप्रतिहतत्वेन तद्वधोत्थावद्यकणिकायास्तीर्थयात्रादिष्विव तदंगतोपपपत्तेरिति । एतदप्यज्ञानांधकारनिकरबाधितदृष्टिताविचेष्टितं । अनुमानादिप्रमाणैर्जलादी-

Indira Gandhi National Centre for the Arts

नामपि जीवत्वेन पूर्वसूरिभिः प्रसाधनात्। तथाहि। आंतरिक्षं जलं सात्मकं। अभ्रादिविकारे स्वतः संभूयपातात्। मत्स्यादिवत्। भौममंभोऽपि सात्मकं। क्षतभूसमानस्य स्वभावस्य संभवात्, दर्दुरादिवत्। तथा वनस्पतिरपि सात्मकः। स्वप्रायोग्याहारेण वृद्धिदर्शनात्, बालादिवत्॥ ॥ तथाप्तप्रणीतागमप्रतिपादितत्त्वाच्च जलादीनां जीवत्वमवसेयं। नच तेषां संदिग्धाप्रमाणता, रागादिविरहितपुरुषविशेषप्रणीतत्वात्। रागवतो हि मतिरसर्ववेत्तृत्वेन, तत्परतंत्रतया च क्वचिन्मोमोहि। द्वेषभाजश्च क्वचित् द्वेष्ये वस्तुनि दोलोहि। अतस्तद्वतः संभवति क्वचिदनृतगिरामभ्युद्गिरणं। तद्रहितस्य तु किं नाम स्यात्तन्निदानं। यदुक्तं। रागाद्वा द्वेषाद्वा मोहाद्वा वाक्यमुच्यते ह्यनृतं। यस्य तु नैते दोषास्तस्यानृतकारणं किं स्यादिति। नच तत्प्रणेतू रागादिनिवृत्तिरपि संशयदोलावलंबितामाकलयित्री, तदुक्ततत्त्वस्य समर्थैरपि परतीर्थिकसार्थैरपि व्यर्थयितुमशक्यत्वात्। पूर्वापराव्याहतवचनवादित्वाच्च। तस्मान्न तत्प्रणीतागमस्य प्रामाण्ये संदेग्धि कश्चनापि विदग्धः। तथाचोविवांसो विद्वांसः। "हितोपदेशात्सकलज्ञक्लृप्तेर्मुमुक्षुसत्साधुपरिग्रहाच्च। पूर्वापरार्थेष्वविरोधसिद्धेस्त्वदागमा एव सतां प्रमाणमिति"। नच हरिहरादिभिराप्तैस्तथानुपदेशनात्संदिग्धमेव जलादेः सात्मकत्वं। तेषां पूर्वप्रदर्शितन्यायेन रागादिमत्त्वेन, प्रदर्शयिष्यमाणयुक्तेश्च सर्वज्ञत्वासिद्धेराप्तत्वाभावात्। अभिधेयं वस्तु यथास्थितं यो जानीते यथाज्ञानं चाभिधत्ते स आप्त इति लक्षणस्याघटमानत्वात्। तथा हरिहरादिभिराप्तैस्तथानुपदेशनमप्यसिद्धं। जले विष्णुरित्यादिना, वेवेष्टि ज्ञानात्मना चराचरोदरमिति विष्णुरितिनिरुक्तेः परमार्थतो जीवत्वस्यैवाभिधानात्। तथा महाभारते आरण्यके पर्वणि पंचमपत्रे। एवं पतति संसारे तासु तास्विह योनिषु। अविद्याकर्मतृष्णाभिर्भ्राम्यमाणोऽथ चक्रवत्॥१॥ ब्रह्मादिषु तृणान्तेषु भूतेषु परिवर्त्तते।

जले भुवि तथाकाशे जायमानः पुनः २ रित्यादिना तृणजलभुवादीनामपि प्राणित्वेन प्रधानत्वाच्च (प्रसाधनाच्च)। तथा। बाधकाभावादपि तेषां तत्त्वमवबोद्धव्यं, तद्बाधकं हि गत्याद्यभावश्चेत्तदा कीलितपुरुषादिना व्यभिचारः। श्वासादिरहितत्वं चेत्तदप्यसत् अस्पष्टस्यातिशयिवेद्यस्य तस्य तेषामभ्युपगतेः। स्पष्टस्य च यूकामत्कुणदंशादीनामप्यदर्शनात्। इत्याद्यनेकशो युक्तिभिः सप्रपंचं प्रपंचितं खल्वेतत्पूर्वसूरिभिरित्यलं विस्तरेणेत्येवं जलादीनां सात्मकतासिद्धेः तत्प्राणिप्राणोपहारकारित्वादवसेया स्नानादिक्रियास्वधर्मांगतेति॥ ॥ यच्चोक्तं तदाश्रितानां कतिपयत्रसजंतूनां वधसंभवेपि तत्क्रियोपार्जितेत्यादि, तत्र विचार्यते किंचित्। ननु तत्र कौतस्कुती पुण्यसंपत्तिरिति वाच्यं। बाह्यदेहमलापगमादिति चेन्न बाह्यदेहमलापगमेप्यांतरमलापगमाभावात् तयोः प्रतिबंधासिद्धेः, परिस्थूलस्य बिफादेरप्यंतर्मलानपगमात्सूक्ष्मतरपापमलापगमसंभावनाया अप्ययुक्तत्वात्। किंच जलेन बहिरशुभमलाद्यपनयनाद्यथांतरस्याप्यशुभमलस्यापनयनानुमितिरेवं स्रक्चंदनागरुकस्तूरीकर्पूरविलेपनादिशुभद्रव्यस्याप्यपहरणदर्शनादांतरशुभकर्म्मणोप्यपहरणप्राप्त्यनुमितिरपि दुर्न्निवारा स्यान्न्यायस्य समानत्वादेवं चानिष्टापत्तिरिति। अथ क्रियात्वादिति चेन्ननु सा किं सामान्यतस्तन्मात्रं विशिष्टा वा काचित्। आद्यविकल्पे त्रिभुवनस्यापि सक्रियत्वात्स्वर्गाद्यावासेष्वेव निवाससंभवात् श्वभ्रादीनां रिक्तताप्रसक्तिः। द्वितीयेतु किंनाम तस्या विशिष्टत्वं, निरवद्यत्वं चेत्तदेतन्महदपत्रपिष्णुताविचेष्टितं। असंख्यसत्त्वोपघातनिर्वर्त्यत्वेनावद्यप्राग्भारस्य तत्रानंतरमेव प्रदर्शितस्याप्यस्मृतेः। आगमप्रतिपादितत्वं त्वनुद्घोष्यमेव, तत्प्रतिपादकागमानां हिंसादिसंसक्तपथोपदेशादिना प्रमाणत्वानुपपत्तेः। यदूचे जिनस्तुतिकृता 'हिंसादिसंसक्तपथोपदेशादसर्वविन्मूलतया प्रवृत्तेः। नृशंसदुर्बुद्धिपरिग्रहाच्च ब्रूमस्त्वदन्यागममप्रमाणमिति"। तथा क्वचि-

Indira Gandhi National Centre for the Arts

न्निषिद्धत्वादपि। तदुक्तं व्यासेन "नोदकक्लिन्नगात्रो हि स्नात इत्यभिधीयते। स स्नातो यो दमस्नातः स बाह्याभ्यंतरः शुचिः १। चित्तमंतर्गतं दुष्टं तीर्थस्नानैर्न शुद्ध्यति । शतशोपि जलैर्धौतं सुराभांडमिवाशुचि ।२। आत्मा नदी संयमतोयतीर्था सत्योदका शीलतटा दयोर्मिः। अत्राभिषेकं कुरु पांडुपुत्र न वारिणा शुद्ध्यति चांतरात्मा। ३ अन्यैरपि। मृदो भारसहस्रेण जलकुंभशतेन च। न शुध्यंति दुराचाराः स्नातास्तीर्थशतैरपि। ४। न शरीरमलत्यागान्नरो भवति निर्मलः। मानसैस्तु मलैर्मुक्तो भवत्येव हि निर्मलः ।५। जायंते च म्रियंते च जलेष्वेव जलौकसः। न च गच्छंति ते स्वर्गमविशुद्धमनोमलाः ।६। तथा। आग्नेयं वारुणं ब्राह्मयं वायव्यं दिव्यमेव च। पार्थिवं मानसं चैव स्नानं सप्तविधं स्मृतं ।७। सप्त स्नानानि प्रोक्तानि स्वयमेव स्वयंभुवा। द्रव्यभावविशुद्ध्यर्थं ऋषीणां ब्रह्मचारिणां ८ इत्यादि"। वपुःकष्टकारित्वं विशिष्टत्वमिति चेत्तदपि न चतुरचित्तचमत्करणचंचु। तस्य हिंसादिक्रियास्वपि समानत्वात्प्रबलप्राणिप्रहाणादावाजीवनाशमपि तस्य संभवात्प्राणिवधस्तूभयत्रापि समान एवेतिदर्शितं। किंच। नायं नियमो यत्स्नानादौ वपुषः कष्टमेव। शिशिरसमयादौ कदाचिदेव तदुपलंभात्। ग्रीष्मर्तुसमयादौ तु शिरसि तपत्तपनखरकरप्रकरप्रोज्ज्वलत्प्रचुरतरतापप्रतापितांगस्य लुलत्कल्लोलावलीप्लवमानस्य परमतमशैत्यसुखसंपदेव प्रोल्लासयत इत्यसिद्धं भोः तत्र वपुःकष्टकारित्वमिति यत्किंचिदेतत्। अथ मनःप्रसादजनकत्वं तद्विशिष्टत्वमभिमतमिति चेत्। ननु कोयं मनः प्रसादो नाम। किं सामान्यतः प्रमोदमात्रं, आहोस्विद्विशिष्टः कश्चनापि लयविशेषः। प्राचीनविकल्पे सौनिकादीनां तत्तद्गर्हितक्रियास्वपि प्रमोदः प्रपोस्फुरीत्येवेति तत्रापि तथाप्रसंगः। द्वितीये तु स किं रागद्वेषादिव्याकुलत्वाभावजनितश्चेतसः स्वास्थ्यविशेषः, अनिर्वाच्यो वा कश्चिन्न तावदाद्यः पक्षोऽक्षुण्णः।

Indira Gandhi National Centre for the Arts

तत्र रागादिव्याकुलत्वाभावासिद्धेः । स्नानं हि गात्रप्रह्लादकत्वेन वपुर्दर्पादिविवर्द्धकतयाऽन्वयव्यतिरेकाभ्यां रागाद्यवष्टं-
भकमेव निष्टंक्यते लोकैरपि । “स्नानं मददर्पकरं कामांगं प्रथमं स्मृतं । तस्मात्कामं परित्यज्य नैव स्नांति दमेरताः” इत्या-
दिवचनात् । अन्यथा कथं रागाद्येषिणामपि भोगिनां बहुपरिचयज्ञाततत्स्वरूपत्वेपि प्रवृत्तिस्तत्र । यदैषिणामनुभवादिज्ञात-
तत्स्वरूपत्वे यत्र प्रवृत्तिस्तस्य तद्धेतुतया व्यवहर्त्तव्यं । यथा नीरोगतैषिणां तत्र प्रवृत्तेरौषधं तथेति कथं तत्र रागाद्यभा-
वजनितं मनःस्वास्थ्यं । तद्धि भगवत्प्रतिमादौ रागादिचिह्नविमुक्ते निरुपमोपशमामृतप्लाविते परिदृश्यमाने पुनः २ स्तद्गुणानु-
चिंतनेन रागादिविस्मृत्या परमोपशमाद्युदयेन जायमानं युक्तिमत् । यद्गुणं हि प्रायो वस्तु चिंत्यते, तद्गुणं चेतोपि संभ-
वदुपलभ्यते, कामिनीरूपादिविकल्पने रागाद्युत्पत्तेर्वीतरागावस्थाध्याने तदपचयस्य चोपलब्धेः । अन्वयव्यतिरेकाभ्यां दर्पा-
दिजननगुणमेव च जलमिति नाद्यः पक्षः क्षेमंकरः । द्वितीयेऽनिर्वाच्योपि रागाद्यभावजन्यश्चेत्कश्चित्तर्ह्यसिद्धता । तत्संपृक्त-
श्चेत्तदा न तेन किंचिदिति वाङ्मात्रमेतत् मनःप्रसादो विशिष्टत्वमित्यपि । ततो विशिष्टक्रियात्वादित्ययमपिहेतुर्न साधी-
यान् । अथ जलस्य पवित्रत्वादिति चेन्न । पवित्रापवित्रव्यवहारस्य लौकिकपरिकल्पितत्वात् । भवतु वा । तत्रापि तेन देह-
स्यैव पावित्र्यं, नांतरात्मनोऽस्य तपोज्ञानादेरेव शुद्धिप्रसिद्धेरन्यथा जगतोपि धार्मिकत्वापत्त्या सैव श्वभ्ररिक्तता । तदूचे-
मानवे धर्मशास्त्रे भृगुप्रोक्तसंहितायां पंचमाध्याये “सर्वेषामेव शौचानामर्थशौचं परं स्मृतं । योऽर्थे शुचिर्हि स शुचिर्न मृद्वा-
रिशुचिः शुचिः ।१। क्षांत्या शुध्यंति विद्वांसो दानेनाकार्यकारिणः । प्रच्छन्नपापा जापेन तपसा वेदवित्तमाः ।२। अद्भिर्गात्राणि
शुध्यंति मनः सत्येन शुध्यति । विद्यातपोभ्यां भूतात्मा बुद्धिर्ज्ञानेन शुध्यति ।।३।।” इत्यादि । तथा स्कंदपुराणे काशीखंडे

Indira Gandhi National Centre for the Arts

षष्ठाध्यायेप्युक्तं मृदो० नश०। जायं०। जलस्य देवत्वात्तत्स्नानं धर्म्महेतुरिति केचित्। कथं ? तत्सर्वव्यापित्व विष्णोरंशत्वात्तथाचोक्तं। भारते आरण्यके पर्वणि। विष्णुराह। अग्निरास्यं क्षितिः पादौ चंद्रादित्यौ च लोचने। द्यौर्मूर्द्धा मे दिशः श्रोत्रे तथापः स्वेदसंभवाः।१। तथा आदित्यपुराणे तृतीयेऽध्याये। अप्सु तिष्ठंति नैवापस्तं विदुः परमेश्वरं। आपो रूपं च यस्यैव नमस्तस्मै जलात्मने। इत्यादीतिचेन्न। तृणकाष्ठादीनामपि तत्प्रसक्तेर्विशेषाभावात्, सर्वेषां निर्वाहहेतुत्वेन महोपकारित्वादितिचेन्न। धूलिधान्यादीनामपि तत्प्रसक्तेस्तस्मात्प्रागुक्तलक्षणायोगाच्च न जलस्य देवत्वं। भवतु वा तदपि। तथापि कथं तत्स्नानस्य धर्म्महेतुता। यतः पायूपस्थपादाद्यधमांगैः संस्पर्शनेन विकुत्स्यातुच्छवपुर्मलव्युत्सर्गेण च प्रत्युतमहत्तराशातनया नरकानुबंध्यवद्यप्रोल्लास एव समीचीनतामंचति। यत्क्रियया हि सामान्यजनोपि क्रुध्यति तत्क्रियया स्वदेवमारिरात्ससीत्यहो मोहनटनाटनप्रकारः॥ अथ मतं न सर्वजलस्नानादौ धर्म्महेतुता, परं गंगागोदावरीनर्मदादितीर्थेषु स्नानादौ सेति चेत्। कथं ? तत्रापि जलमात्रत्वाविशेषात्। तीर्थत्वमेव विशेष इतिचेत्, किं तत् द्रव्यतो भावतो वा द्रव्यतश्चेत् साध्वभिहितवानसि। "दाहोपशमस्तृष्णाविच्छेदो मलविशोधनं चैव। त्रिभिरर्थैर्नियुक्तं तस्मात्तद्द्रव्यतस्तीर्थमिति" न्यायोपपत्तेः, परं तत्स्नाने दाहोपशमाद्येव युक्तं नत्वात्मशुद्ध्यादि पूर्वोक्तविकल्पानतिवृत्तेः चित्तमंतर्गेत्यादिव्यासवचनाच्चेति। द्वितीयपक्षश्चेत्तदसत्यं क्रोधविनिगृहीते दाहस्योपशमनं भवति तीर्थे, लोभे च निगृहीते तृष्णाविच्छेदनं च स्यात्। "अष्टविधं कर्मरजो बहुतरभवसंचितं यतो नश्येत्। संयमतपोभिरुग्रैस्तस्मात्तद्भावतस्तीर्थमिति" तल्लक्षणायोगात्। भावे वा तत्र भावतीर्थत्वस्य पूर्वोक्तयुक्त्या तत्र स्नाने तीर्थो[illegible]गतनाप्रसक्तिः। किंच व्यासेनापि ज्ञानादीनामेव भावतीर्थत्वमभ्यधायि तदुक्तं। स्कंदपु० काशी

खंडे षष्ठेऽध्यायेऽगस्त्यो लोपामुद्रामाह ॥ श्रृणु तीर्थानि गदतो मानसानि ममानघे । येषु सम्यग्नरः स्नात्वा प्रयाति परमां गतिं ।१। सत्यं तीर्थं क्षमा तीर्थं तीर्थमिंद्रियनिग्रहः । सर्वभूतदया तीर्थं तीर्थमार्जवमेव च ॥ २ ॥ दानं तीर्थं दमस्तीर्थं संतोषस्तीर्थमुच्यते । ब्रह्मचर्यं परं तीर्थं तीर्थं च प्रियवादिता ॥ ३ ॥ ज्ञानं तीर्थं धृतिस्तीर्थं पुनस्तीर्थमुदाहृतं । तीर्थानामपि यत्तीर्थं विशुद्धिर्मनसः परा ॥ ४ ॥ ध्यानपूते ज्ञानजले रागदोषमलापहे । यः स्नाति मानसे तीर्थे स याति परमां गतिमित्यादि । यद्यप्यत्रैवानेन पौराणिकव्यासेन पारासर्येण नद्यादीनामपि तीर्थतोक्ता पुण्यहेतुतया तद्यथा । यथा शरीरस्योद्देशाः केचित्पुण्यतमा स्मृताः । तथा पृथिव्यामुद्देशाः केचित्पुण्यतमाः स्मृताः ॥ १ ॥ प्रभावादद्भुताद्भूमेः सलिलस्य च तेजसा । परिग्रहान्मुनीनां च तीर्थानां पुण्यता स्मृतेत्यादि । परमस्य प्रत्यक्षोपलम्भ्यविसंवादवचननिश्चीयमानासर्ववेत्तृत्वस्य निर्युक्तिवचोवादिनः कः प्रेक्षाचक्षुषां विश्वासो वचनेषु । निर्युक्तिवचोवादित्वं चास्य सूपपादमेवेत्युपेक्ष्यते । किं तर्हि क्वचित्तद्वचःसंवादः प्रदर्श्यते भवतेतिचेदुच्यते । एकांते स्वदर्शनश्रद्धालुतया भवता तत्र प्रामाण्याभ्युपगतेरस्माकमपि क्वचित् जिनवचोंऽभोधिसीकरतयैव तद्वचसां सम्मतत्वात् तदाह श्रीजिनस्तुतिकृत् । ‘सुनिश्चितं नः परतंत्रयुक्तिषु स्फुरंति याः काश्चन सूक्तसंपदः । तवैव ताः पूर्वमहार्णवोद्धृता जगुः प्रमाणं जिनवाक्यविप्रुष इत्यादि’ । तन्न स्नानक्रियादौ पुण्यकणिकापि प्रोन्मीलतीति किं भवेत्तत्र षड्विधजंतुवधोत्थपातकघाताय, येन स्यात्तीर्थयात्रादिदृष्टांतावष्टंभस्य सुष्ठुतेति । ततश्चैवं तद्धाविनाभाविस्नानाद्यधर्म्मक्रियास्वपि धर्म्मधियाप्रवृत्तेर्न सर्वथा लौकिकधर्मेषु षड्जीवतत्त्वपरिज्ञानपूर्वकस्तद्रक्षाप्रयत्न इति शुद्धः प्रथमो हेतुरिति ॥

Indira Gandhi National Centre for the Arts

तथाऽसर्ववेत्तृप्रणीतत्वमपि तत्र सिद्धमेव । यतस्तत्प्रणेता किमीश्वरस्तदन्यो वा स्यात् । ईश्वरश्चेत् तन्न, तस्यादेहित्वेन वक्तृत्वायोगात् । वचनं हि वर्णात्मकं । वर्णाश्च ताल्वादिप्रयत्नाविनाभाविन इति कथमदेहस्य तत्संभवः । देहित्वाभ्युपगमे च तस्य । अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः सशृणोत्यकर्णः । स वेत्ति विश्वं नहि तस्य वेत्ता तमाहुरग्रं पुरुषं महांतमित्याद्यागमविरोधः । अथास्यावस्थाद्वयमभ्युपगम्यते । एका परमशिवावस्थैव अपरा च संसारावस्था । हंत तर्हि मायाविनोऽस्य नटवन्नानारूपविडंबनाडंबरस्य कः सुधीः श्रद्दधीत वचःप्रपंचं, कथं च सर्वविस्त्वमिति । अथ स्वरूपेणादेहोप्यनंतशक्तिमत्त्वात्सत्त्वोपकृतये देहमारचय्य तत्त्वमुपदिशतीत्येतदप्यसाधिष्ठं । यतः स नित्य एकस्वभाव ईशश्चाभ्युपगम्यते । ततश्च तस्य स्वदेहोत्पादने सहकार्यपेक्षायामनीशतानुषंगः । ईशस्य परापेक्षायोगात् । एतदेव ह्यनीशतालक्षणं यत्परमुखप्रेक्षितेति । तदनपेक्षायां स किं नित्यं देहमुत्पादयत्यनित्यं वा । नित्यं चेत्तदा सदेहत्वप्रसंगस्तस्य प्रलयाभावात् तथाच स्वरूपेणादेह इति वाङ्मात्रं स्यात् । अनित्यं चेत् तर्हि ईश्वरस्याप्यनित्यताप्रसंगः । सर्वथा कारणनित्यत्वे कार्यानित्यताया अयोगात् । कार्यं निदानाद्धि गुणानधीते इति वचनात्तदन्यकारणांतरस्यानभ्युपगमाच्च, तदभ्युपगमे पूर्वोक्तदोषादिति । किंच तदनित्यं वपुः किमीश एव विनाशयति परो वा कश्चित् । ईश एव चेत् तत्किं येन स्वभावेन विदध्यात्तेनैवापहरति, स्वभावांतरेण वा । तेनैव चेत् कथं कार्यभेदः कारणस्वभावहेतुकत्वात् कार्यभेदस्य । इश्वरेच्छासहकारिसामग्रीभेदात्कार्यभेद इति चेत् तत्राप्येतत्पर्यनुयोगानतिवृत्तेस्तथाहि येन स्वभावेनैकसहकारिसामग्र्यां स व्याप्रियते द्वितीयायामपि तेनैव तदंतरेण वा । न तावत्तेनैव । कार्यभेदप्रसंगस्य तादवस्थ्यात्तत्रापि सामग्र्यंतरापेक्षायामनवस्थापत्तेः । अथ

स्वभावांतरेण तदा स्वभावेनैवेशस्य भिन्नकार्यकरणे समर्थत्वात्किं सहकारिसामग्रीपरिकल्पनेन । परमेवमीश्वरस्यानित्यता-
प्रसक्तिः, स्वभावभेदादप्रच्युतानुत्पन्नस्थिरैकस्वभावं नित्यमितितल्लक्षणायोगात् । अथ परो विनाशयतीतिपक्षस्तदेश्वरेण
प्रयत्नकृतां स्वां तनुं परो विनाशयतीति महीयानीश्वरस्य महिमोपवर्णितो भवता । अथ स्वकार्यकरणानंतरं स्वयमेवैतद्वि-
नश्यति इति चेत् ननु तथापि स्वविनाशे तत्किमप्यपेक्षते नवा । नापेक्षते चेत् तर्हि निर्हेतुकोऽस्य विनाश इति कथं
कादाचित्को, निर्हेतुकस्य कादाचित्कत्वायोगात् । नित्यं सत्त्वमसत्त्वं वाऽहेतोरन्यानपेक्षणादितिवचनात् । कथं वा कदाचि-
दकृतेपि कार्ये न विनाशः, कृतेपि वा न न विनाश इति । ईश्वरसंजिहीर्षामपेक्षत इति चेत् न तस्य नित्यत्वेनैकस्वभाव-
त्वेन सिसृक्षासंजिहीर्षारूपविरुद्धेच्छाद्वयायोगस्य प्रदर्शितत्वात् । तन्नेश्वरसर्वज्ञप्रणेतृत्वं लौकिकधर्मेषु कोप्यवलंबि ॥ अथे-
श्वरादन्यस्तत्प्रणेतेति चेत् । ननु सोऽयं सर्वज्ञोऽसर्वज्ञो वा, सर्वज्ञश्चेत्तर्हि स वेत्ति विश्वं नहि तस्य वेत्तेत्यादीश्वरसर्वज्ञाद्वयप्र-
ख्यापकागमविरोधः । परेषामपि सर्वज्ञत्वेन तद्वेत्तृत्वापत्तेरन्यथा सर्वविस्त्वविरोधात् । अथासर्वज्ञश्चेत् स्ववचसैवाभ्युपगतं ।
तर्ह्यसर्ववेत्तृप्रणीतत्वमिति सिद्धं नः समीहितमिति ॥ ७ ॥ किंच तत्प्रतिपादकागमा एव परस्परविरुद्धार्थाभिधायितया स्वप्र-
णेतुरसर्वविस्त्वमावेदयंतीति किमस्माकं प्रयासेन । तथाहि ॥ न हिंस्यात्सर्वभूतानीतिप्रथममुक्त्वा पश्चात्तत्रैव पठितं । षट्-
शतानि नियुज्यंते पशूनां मध्यमेऽहनि । अश्वमेधस्य वचनान्न्यूनानि पशुभिस्त्रिभिः । तथा । अग्नीशोमीयं पशुमालभेत ।
सप्तदश प्राजापत्यान् पशूनालभेतेत्यादि । तथानृतभाषणं प्राङ्निषिद्ध्य ब्राह्मणार्थेऽनृतं ब्रूयादित्यादि । तथा न नर्मयुक्तं
वचनं हिनस्ति न स्त्रीषु राजन्न विवाहकाले । प्राणात्यये सर्वधनापहारे पंचानृतान्याहुरपातकानि । तथादत्तादानमनेकधा

॥ १८ ॥

Indira Gandhi National Centre for the Arts

निरस्य पश्चादुक्तं– यद्यपि ब्राह्मणो हठेन परकीयमादत्ते बलेन वा तथापि तस्य नादत्तादानं यतः सर्वमिदं ब्राह्मणेभ्यो दत्तं । ब्राह्मणानां तु दौर्बल्याद्वृषलाः परिभुंजत इत्यादि । तथा अपुत्रस्य गतिर्नास्ति इति लपित्वा “अनेकानि सहस्राणि कुमारब्रह्मचारिणाम् । दिवं गतानि विप्राणामकृत्वा कुलसंततिं” । इत्यादि । कियंतो वा दधिमाषभोजने कृष्णा विवेच्यंत इति साधूक्तमसकलकलयितृप्रणीतत्वादपि न लौकिकधर्माः सिद्धिसीमंतिनीसंगहेतव इति निरवद्योऽयं द्वितीयहेतुरपि॥२॥

अथ तृतीयस्त्वाबालगोपालांगनं प्रसिद्धिपराभूतासिद्धतादिदोष एव । यतस्तत्परिग्रहिणः प्रायो विप्रादयः प्रसिद्धिपदवीप्रपन्ना दरिदृश्यंते तदुपदेष्टारोऽपि च । ते च प्रायः सामान्यजनेभ्योऽपि समधिकक्रोधलोभाद्यभिभूतचित्ताः शिष्टमार्गातिवर्त्तिनो दूरे स्वस्वशर्ममर्मभिद्धर्म्मकथाया अपि । ये ह्यगाधलोभांभोधिनिमग्नचेतसो मोहांधिततया अपश्यंतः कृत्यादिविभागं विभागं विकुत्स्य म्लेच्छसेवादीन्यप्यकृत्यान्याद्रियंते, ये चोग्रतरक्रोधाभिख्याद्दामरक्षोधिष्ठिताः स्ववपुःपीडाद्यप्यवगणय्य शिरोजठरपरिस्फोटनादिभिरपि प्रकटयंत्यात्मन्यौत्कट्यसंटंकं तेऽपि पुण्यश्नैपुण्यभाजनमिति कस्य न हास्यमुदेति । तथा दुरवस्थोपस्थादींद्रियग्रामविसंस्थुलितचेतना निःशेषदोषशरणे रमणीजनांगरमणादावविरमं रसिकस्वांता गर्त्ताशूकरा इवाशौचनीया धर्म्मं संस्पृशंतोपि मालिन्यधराधरमधिरोहयंति । किंचोच्छिन्नाशेषविशेषातिशयप्रकाशे कलिकालावकाशे आप्तप्रणीतशास्त्राण्येव धर्माश्वबोधयोराधारः । तानि च विप्रैः सर्वजनातिविशिष्टगृहवासोपसेविभिस्तत्तत्पुत्रपुत्र्यादिविवाहाजीविकाद्रव्योपार्जनोपायाद्यनेकचिंताचक्रव्याकुलितचेतोभिर्दुःसाधावबोधधारणानीति कथं ते धर्मधुराधरणधुरंधरतामादधीरन् । किंच तेषां ब्राह्मणत्वमपि नाममात्रादेव न परमार्थतस्तत्स्वरूपं ह्येवमभ्यधायि “ गुणैः कुंदेंदुवि-

Indira Gandhi National Centre for the Arts

मलैर्व्रतयमपरायणः । यो वाहयति पापानि स वै ब्राह्मण उच्यते ॥ १ ॥ दानशीलक्षमावीर्यध्यानप्रज्ञादयो गुणाः । यत्र सर्वे समाः संति स वै० ॥ २ ॥ ब्राह्मणो ब्रह्मचर्येण यथा शिल्पेन शिल्पिकः । अन्यथा नाममात्रं स्यादिंद्रगोपककीटवत् ॥ ३ ॥ सत्यं ब्रह्म तपो ब्रह्म ब्रह्म इंद्रियनिग्रहः । सर्वभूतदया ब्रह्म एतद्ब्राह्मणलक्षणं ॥ ४ ॥ एकवर्णमिदं सर्वं पूर्वमासीद् युधिष्ठिर । क्रियाकर्म्मविभागेन चातुर्वर्ण्यं व्यवस्थितं ॥ ५ ॥ शूद्रोऽपि शीलसंपन्नो गुणवान् ब्राह्मणो भवेत् । ब्राह्मणोऽपि क्रियाभ्रष्टः शूद्रात्प्रत्यंतरो भवेत् ॥६॥ ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्चैव युधिष्ठिर । निर्वृतश्चरति यो धर्म्मं तमेव ब्राह्मणं विदुः ॥ ७ ॥ चतुर्वेदोऽपि यो विप्रः शुद्धं धर्मं न सेवते । वेदभारधरो मूर्खः स वै ब्राह्मणगर्दभः ॥ ८ ॥ कृषिवाणिज्यगोरक्षां राजसेवां चिकित्सितं । ये विप्राः प्रतिपद्यंते न ते कौंतेय ब्राह्मणाः ॥ ९ ॥ गोरक्षकान् वाणिजकान् प्रेष्यान् वार्द्धुषिकांस्तथा । मैथुने च रतान्नित्यं विप्रान् शूद्रवदाचरेत् ॥ १० ॥" इत्यादि ॥ अतो भ्रष्टाचारैः प्राणातिपातमृषावादादत्तादानाब्रह्मपरिग्रहाद्यासक्तैरपि परिगृहीतधर्मे कः प्रेक्षाचक्षुषां विश्वासः । यतः कदाचारोपरचितपरिग्रहं निश्चितहितमपि नाद्रीयते वचनादि । यदुक्तं । शीतेऽपि यत्नलब्धो न सेव्यतेऽग्निर्यथा स्मशानस्थः । शीलविपन्नस्य वचस्तथ्यमपि न गृह्यते तद्वत्॥१॥" इति कथं दक्षक्षोदाक्षमस्तत्परिगृहीतोपि धर्म्मः सेव्य इति विचारणीयं चतुरैस्त्रयीतत्त्वमिति ॥ त्रैविद्यगोष्ठी ॥ छ ॥

श्रीमत्तपागणनभोंऽगणभास्करराभश्रीदेवसुंदरगणाधिपशिष्यकेण । श्रीज्ञानसागरगुरूत्तमपाठितेन बाल्येऽपि तर्ककुतुकान्मुनिसुंदरेण ॥ १ ॥ शरशरमनुमितवर्षे १४५५ स्वस्यान्येषां च शैशवे सुधियां । जिह्वापटिमोपकृते विदधे त्रैवैद्यगोष्ठीयं ॥ २ ॥ इति त्रैवैद्यगोष्ठी श्रीमुनिसुंदरसूरिभिः शैशवे कृता ॥ ॥ ॥

457-
DATA ENTERED
Date 09/06/08
IGNCA RAR
ACC No R-140
Indira Gandhi National Centre for the Arts

सहस्रावधानसौधस्तम्भसमानश्रीमुनिसुन्दरसूरिविहिता.

त्रैविद्यगोष्ठी.

IGNCA RAR
ACC. No. R-140

प्रसिद्धकर्त्ता श्रीलालबागजैनसङ्घ तरफथी शा. देवकरण मुलजी, मुंबई.

प्रति. ५००

मुंबई कोलभाटलेन घर नं. २३ आवेला—निर्णयसागर प्रेसमां बाळकृष्ण रामचंद्र घाणेकरने प्रसिद्ध करनारके लिये छा

वीरसंवत् २४३६. विक्रम संवत् १९६६.

Indira Gandhi National Centre for the Arts

Indira Gandhi National
Centre for the Arts